॥ इति (अग्ने) अरण्यगाने प्रथमप्रपाठकः द्वितीयः खण्डः ॥ २ ॥

(१५।१)

॥ वासिष्ठजमदग्न्योरर्कौ द्वावगस्त्य-जमदग्न्योर्वा वासिष्ठस्त्रिष्टुबिन्द्रः ॥

इयाऽ३होइ । (त्रिः) । इन्द्रन्नरो । नेऽ२माधि । ताहवन्ताइ ॥ यत्पारियाः । युनज ।
ताइधियस्ताः ॥ शूरोनृषा । ताऽ३श्रव । सश्चकामाइ ॥ आगोमताइ । व्रजेभ ।
जातुवन्नाः । इयाऽ३होइ । (द्विः) । इयाऽ३होऽ२ । याऽ२३४औहोवा ॥ ईऽ२३४५ ॥

(दी० ११ । प० २० । मा० ११)

(१५।२)

॥ जमदग्निस्त्रिष्टुबिन्द्रः ॥

ओहाइया । (त्रिः) । इन्द्रन्नरो । नेऽ३माधि । ताहवन्ताइ ॥ यत्पारियाः । युनज ।
ताइधियस्ताः ॥ शूरोनृषा । ताऽ३श्रव । सश्चकामाइ ॥ आगोमताइ ।
व्रजेभ । जातुवन्नाः । ओहाइया । (द्विः) । ओहोऽ३४५याऽ६५६ ॥ ईऽ२३४५ ॥

(दी० २५ । प० ११ । मा० ११)

(१६।१)

॥ स्वाशिरामर्कः स्वाशिरा गायत्री सोमेन्द्रौ ॥

अयामायाम् । अयामायाम् । अयामायाम् । स्वादिष्ठयाऽ२ । मदाइष्ठाऽ२३४या ॥
पवस्वसोऽ२ । मधाराऽ२३४या ॥ इन्द्रायपाऽ२ । तवाइसूऽ२३४ताः ॥
अयामायाम् । अयामायाम् । अयाम् । आऽ२ । याऽ२३४ । औहोवा ॥ इऽ२३४५ ॥

(दी० १० । प० १२ । मा० ९)

[साम-तन्त्र-सूत्राणि ...]

[१०]१ ... (पुष्ट ...)

[illegible]

[illegible]

[illegible] ॥

[illegible] ।

[illegible] ।

[illegible] ।

[illegible] ।

[illegible] ॥

[illegible]

[illegible] ।

[illegible] ॥

[illegible] ॥

[illegible]

[illegible] ॥

[illegible]

वासिष्ठो मैत्रावरुणिः । इन्द्रः । त्रिष्टुप् । (ऋ० ७।२७।३)

इन्द्रो राजा जगतश्चर्षणीनामधि क्षमि विषुरूपं यदस्ति ।
ततो ददाति दाशुषे वसूनि चोदद्राध उपस्तुतश्चिदर्वाक् ॥ ५८

२० अयं पूषा रयिर्भगः० । (ऋ. ९।१०१।७; सा. ५४६, ८१८; ग्रा. [illegible]

२१ इन्द्रो राजा जगतश्चर्षणीनामधिक्षमा विश्वरूपं यदस्य ।
ततो ददाति दाशुषे वसूनि चोदद्राध उपस्तुनं चिदर्वाक् ।

(२०।१)

॥ प्रजापतेरर्कः प्रजापतिरनुष्टुप् द्यावापृथिवी ॥

होवा । ईया । औऽ२३होआऽ३ । आयाम् । पूषाऽ२ । रयिर्भोऽ२३४गाः ॥
सोमाः । पुनाऽ२ । नोअर्षोऽ२३४ती ॥ पातीः । विश्वाऽ२ । स्यभूमाऽ२३४नाः ।
वाया । स्व्यद्रोऽ२ । दसीऊऽ२३४भाइ । होवा । ईया । औऽ२३होआऽ३४ ।
ओहोवा ॥ ईऽ२३४८ ॥

(२१।१)

॥ इन्द्रस्यार्कौ द्वौ इन्द्रस्त्रिष्टुबिन्द्रः ॥ ([illegible])

हावीन्द्राः ॥ राजा । जगतः । चर्षणीनाम् । नाम् । नाम् । नाओइनम् । (त्रिः) ।
नाहोइनम् ।(त्रिः)। हावौहोहाउ । अधिक्षमा । विश्वरू । पंयदस्या । स्या । स्या ।
स्याओइनम् । (त्रिः)। स्याहोइनम् ।(त्रिः । औहोहावाहोऽ२ ॥ ततोददा ।
तोऽ२दाशु । पाइवसूनी । नी । नी । नाओइनम् । (त्रिः)। नाहोइनम् । त्रि ।
हावाहोहाउ ॥ चोदद्राधाः । उपस्तु । तंचिदर्वा । वा । वा । वाओइनम् । (त्रिः ।
वाहोइनम् ।(त्रिः)। औहोहावाहोऽ२ । हाउवाऽ३ ॥ ईऽ२३४५ ॥

(२१।२)

इन्द्रोहाउ ॥ राजा । जगतः । चर्षणीनाम् । नाम् । नाम् । नावा । (त्रिः ।
([illegible])
नोवाहाइ ।(त्रिः)। हाओऽ३ । हाऽ३हाउ । अधिक्षमा । विश्वरू । पंयदस्या ।
स्या । स्या । स्यावा ।(त्रिः । स्यावाहाइ ।(त्रिः)। हाओऽ३ । हाऽ३हाउ ॥
ततोददा । तोऽ३दाशु । पाइवसूनी । नी । नी । नावा । (त्रिः) । नोवाहाइ । (त्रिः)
हाओऽ३ । हाऽ३हाउ ॥ चोदद्राधाः । उपस्तु । तंचिदर्वा । वा । वा ।
वावा ।(त्रिः)। वावाहाइ । (३) हाओऽ३ । हाऽ३हाउ । वाऽ३ । ईऽ२३४५ ॥

[साम-तन्त्र-[illegible]

शुनःशेप आजीगर्तिः, कृत्रिमो देवरातो वैश्वामित्रो वा । वरुणः । त्रिष्टुप् । (ऋ० १।२४।१५)

उदुत्तमं वरुण पाशमस्मदवाधमं वि मध्यमं श्रथाय ।
अथा वयमादित्य व्रते तवानागसो अदितये स्याम ॥ ५८९ ॥

॥ वामदेवो गौतमः । इन्द्रः । गायत्री । (न ऋग्वेदीयः)

२२ यस्येदमा रजोयुजस्तुजे जने वनं स्वः ।
इन्द्रस्य रन्त्यं बृहत् ॥ ५८८ ॥

२३ उदुत्तमं वरुण पाशमस्मदवाधमं वि मध्यमं श्रथाय ।
अथादित्य व्रते वयं तवानागसो अदितये स्याम ॥ ५८९ ॥

(२२।१) ॥ अर्कशिरः अर्को गायत्रीन्द्रः ॥

हाउयास्या ॥ इदमारजोयूऽ१जाऽ२ः ॥ तुजेजनेवनाँ३स्वऽ१वाऽ२ः ॥ आइन्द्रस्याऽ२३४५राऽ६५६।
तियंबृहत् ॥ (दी० ३ । प० ५ । मा० ५)११(णु । ३८)

(१) ॥ अर्कग्रीवाश्च अर्को यजुरर्कः ॥

पातीऽ२ः ।(त्रिः)। दिवआ ॥ पातीऽ२ः ।(त्रिः)। अन्तरिक्ष । स्या । पातीऽ२ः । (त्रिः) ।
पार्थिव । स्या ॥ पातीऽ२ः (त्रिः)। अपामोषधी । नाम् ॥ पातीऽ२ः । (त्रिः) । विश्वस्यभूत ।
स्या । पातीऽ२ः । पातीऽ२३ः । पाऽ२ । ताऽ२३४ । औहोवा ॥ ए । पतिर्दिवः ।
ए । पतिरन्तरिक्षस्य । ए । पतिःपार्थिवस्य । ए । पतिरपामोषधीनाम् ।
ए । पतिर्विश्वस्यभूतस्य । ए । सुवर्ज्योतीऽ२३४५ः। (दी० २० । प० ४१ । मा० २२)१२(पा । ३९)*

(२३।१) ॥ वरुणगोतमयोरर्कः वरुणगोतमौ त्रिष्टुप् वरुणादित्यौ ॥

हाउहाउहाउ । आयुश्चक्षुर्ज्योतिः । औहोवा । इया । उदुत्तमंवरुणपाशमाऽ२३स्मात् ॥
अवाधमंविमध्यमँ३श्रथाऽ२३या ॥ अथादित्यव्रतेवयंताऽ२३वा ॥
अनागसोआदितयेसियाऽ२३माऽ३ । हाउहाउहाउ । आयुश्चक्षुर्ज्योतिः ।
औहोवा । ईऽ२ । याऽ२३४ । औहोवा ॥ ईऽ२३४५ ॥(दी० २१ । प० १५ मा० १०)१३(डौ । ४०)

*॥ अस्य मूलं न ऋक्, अपि तु स्तोभः स चैषः—(स्तोभपदे १-६-२)

(१)पतिः । दिवः । अन्तरिक्षस्य । पार्थिवस्य । अपाम् । ओषधीनाम् ।
ओष । धीनाम् । विश्वस्य । भूतस्य ॥

[साम-तन्त्र-सूत्राणि][३८]११ नार्कद्वन्द्वेऽचश्रुपि १३. ३. १०; [३९]१२ (पृथक् सूत्राणि न सन्ति)
[४०]१३ रादि षडक्षरं गिवत् १३..४;

२४ इन्द्रं नरो नेमधिता० । (ऋ० ७ । २७ । १; सा० ३१८; आ. गे. ५

२५ मूर्धानं दिवो अरतिं० । (ऋ० ६ । ७ । १; सा. ६७, ११४०; ग्रा० गे

(२४।१)

॥ अर्कपुष्पे द्वे प्रजापतिस्त्रिष्टुबिन्द्रः ॥

इय । होइ । इयइयईऽ३या । (त्रीणि त्रिः) । इन्द्रन्नरो । नेऽ३मधि ।
ाहवताइ ॥ यत्पारियाः । युनज । ताइधियस्ताः ॥ शूरोनृपा । ताऽ३श्रव ।
श्वकामाइ । आगोमताइ । व्रजेभ । जातुवन्नाः । इय । होइ । इयइयईऽ३या ।
। होइ । इयइय । ईऽ२ । याऽ२३४ । औहोवा ॥ ईऽ२३४५ ॥

(४।२)

। होइ । उवउवऊऽ३वा । (त्रीणि त्रिः) । इन्द्रन्नरो । नेऽ३मधि ।

(कौ० ११ । प० ३४ । सा० २४)

वन्ताइ ॥ यत्पारियाः । युनज । ताइधियस्ताः ॥ शूरोनृपा । ताऽ३श्रव ।
कामाइ ॥ आगोमताइ । व्रजेभ । जातुवन्नाः । उव । होइ । उवउवऊऽ३वा ।(
उव । होइ । उवउव । ऊऽ२ । वाऽ२३४ । औहोवा ॥ ईऽ२३४५ ॥

(कौ० ११ । प० ३४ । सा० २४) २५(

॥ पञ्चदशस्तृतीयः खण्डः ॥ ३ ॥

(२५।१)

॥ ज्येष्ठ साम आज्यदोहम् अग्निर्वैश्वानरस्त्रिष्टुबग्निर्वैश्वानरः ॥

हाउहाउहाउ । आज्यदोहम् ।(त्रिः) । मूर्धानन्दाइ । वाऽ३अर । तिंपृथिव्याः ॥
वैश्वानराम् । ऋतआ । जातमग्नीम् ॥ कविंस्सम्रा । जाऽ३माति । थिंजनानाम् ॥
आसन्नःपा । त्राऽ३इ०जन । यन्तदेवाः । हाउ, ३) । आज्यदोहम् । (द्विः) ।
आज्यदोऽ५हाउ । वा ॥ ए । आज्यदोहम् । (द्वे द्विः) । ए । आज्यदोहोऽ२३४५म् ।

२५।२)

॥ इंनिधनमाज्यदोहम् । (इति दैविकसंकेतः) ॥

(कौ० ३३ । प० ३३ । सा० ३३) २३(छि

उहाउहाउ । हिम्स्थिचिदोहम् । चिदोहम् । चिदोहम् । मूर्धानन्दाइ । वाऽ३अर । तिंपृथिव्
वैश्वानराम् । ऋतआ । जातमग्नीम् ॥ कविंस्सम्रा । जाऽ३माति । थिंजनानाम् ॥
आसन्नःपा । त्राऽ३इ०जन । यन्तदेवाः । हाउहाउहाउ । हिम्स्थिचिदोहम् ।
चिदोहम् । चिदोऽ३हाउ । वाऽ३ ॥ ईऽ२३४५ ॥

(कौ० ३३ । प० ३३ । सा० ३३) २५ द्राह्य

[साम-तन्त्र-सूक्त ...]

२६ सुरूपकृत्नुमूतये० । (ऋ० १ । ४ । १; सा. १६०,१०८७; ग्रा. गे. २७८-२८१)
२७ पिबा सोमामिन्द्र० । (ऋ. ७ । २२ । १; सा. ३९८, ९२७; ग्रा. गे. ६९३-६९४)
२८ स्वादोरित्था विषूवतः० । (ऋ. १ । ८४ । १०; सा. ४०९,१००५; ग्रा. गे. ७१३)

(२५।३) ॥ ऋत-निधनमाज्यदोहम् । (इति वैदिकसंकेतः) ॥

हाउ(३) । च्योहम् । (त्रिः) । मूर्द्धानन्दाइ । वाऽ३अर । तिपृथिव्याः ॥ वैश्वानराम् । ऋतआ । जातमग्नीम् ॥ कविंसम्रा । जाऽ३मति । थिंजनानाम् ॥ आसन्नःपा । त्राऽ३०जन । यन्तदेवाः । हाउ(३) । च्योहम् । (द्विः) । च्योऽ३हाउ । वाऽ३ ॥ एऽ३ । ऋतम् ॥ (दी० १५ । प० २३ । मा० २१)१८(ग्र । ४५)

(२६।१) ॥ रुद्रस्य त्रय ऋषभाः, तत्रेदं प्रथमं रैवतऋषभः रुद्रो गायत्री प्रजापतिः ॥

सुरूपकृत्नुमूतयो (त्रिः)। सुदुघामिवगोदुहे । जुहूमसाइ ॥ द्यविद्यवाइ ॥ (द्विः) । द्यविद्यवाऽ३१उ । वाऽ२३ ॥ उम् । (त्रिः) ॥ (दी० १५ । प० १२ । मा० ७)१९(फे । ४६)

(२७।१) ॥ वैराजऋषभमिदं द्वितीयम् रुद्रो विराडिन्द्रः ॥

हाउहाउहाउ । आइही । (त्रिः) । आइ । (त्रिः) । ईयाहाउ । (त्रिः) । पिबासोमाम् । इन्द्र । मन्दतुत्वा ॥ यन्तेसुपा । वाऽ३हरि । अश्वअद्रीः ॥ सोतुर्बाहू । भ्याऽ३ंसुय । तोनअर्वा ॥ हाउ(३) । आइही ।(त्रिः)। आइ।(त्रिः)। ईयाहाउ।(द्विः)। इयाऽ३हाउ।वाऽ३ ॥ ईऽ२३४५॥ (दी० १२ । प० ३१ । मा० २८)२०(च्रं । ४७)

(२८।१) ॥ शाकरऋषभमिति तृतीयम् रुद्रःपङ्क्तिरिन्द्रः ॥

ओऽ३१म् ।(त्रिः)। स्वादोरिइत्थाएविपूएवतआ । शंयोः । शंयाः ॥ मधारिपिबाएन्तिगाएरियआ । हविः ।(द्विः)। याआएन्द्रेणाएसयाएवरिया । सुवः॥(द्विः)। वृष्णाएमदाएन्तिशोएभमथाआ । ज्योतिः॥(द्विः)। वस्वीरअनूएस्वराएजियमा । ओऽ३१म् ।(द्विः)। ओऽ३१२३४ । वा ॥ इट्स्थिइडाऽ२३४५ ॥ (दी० ३८ । प० २१ । मा० ३२)२१(टा । ४८)

[साम-तन्त्र-सूत्राणि][४५]१८ [४७]२० (पृथक् सूत्राणि न सन्ति) [४६]१९ ऊ ७.५.८.
[४८]२१ शक्वोमयोरेजाः १३.१.५; दं: ९.२.७; गौं: १२.२.१०.

(२६।१) द्यविद्यवाइ-इति मध्यमोऽन्त्यमः प्रतिहारः ॥ प्रतिहारसू० १.११.१२;
(२८।१) भक्तिविभागः प्रतिहारसूत्रभाष्ये स्पष्टः ॥ प्रतिहारसू० १.११.१८;

२९ पुरोजिती वो अन्धसः० । (ऋ० ९ । १०१ । १; सा० ५४५, ६९७; ग्रा. गे. १०५९-१०६१)
३० असाव्यꣳशुर्मदाय० । (ऋ. ९ । ६२ । ४; सा. ४७२, १००८; ग्रा. गे. ८६५-८७२)
३१ अभी नवन्ते अद्रुहः० । (ऋ० ९ । १०० । १; सा. ५५०; ग्रा. गे. १०८०-१०८२)

(२९।१) ॥ अतीषंगानि त्रीणि, इन्द्रस्य त्रयोऽतीषंगाः, अथापरं रौद्रः रुद्र इन्द्रोनुष्टुप् गायत्री सोमः ॥
एपुरोजिती ॥ वोअन्धसस्सुतायमादयाऽ२इत्नवाइ । इडा ॥ उत्वा ॥ तजातमाऽ२न्धसाः ।
अथा ॥ दाइवी ॥ सन्नूमियाऽ२ददाइ । अथा ॥ उग्रम् ॥ शर्मसहाऽ२इश्रवाः ।
अथा । अपश्वानꣳश्नथाऽ१इष्टाऽ३ना ॥ सखायोदीर्घजाऽ२३होइ ॥ ह्वायमाऽ३१उवाऽ२३ ॥
इड्स्थिइडाऽ२३४५ ॥ ([illegible])॥ (नि । ४९)

(३०।१) ॥ वासवः इन्द्रस्त्रिष्टुप् गायत्री सोमः [illegible] ॥

एआसा ॥ जिवक्कारꣳय्यथाऽ२जाउ । इडा ॥ आसा ॥ व्यꣳशुर्मदाऽ२ना ।
अथा ॥ धाया ॥ मनाताप्रथमामनाऽ२इषा । इटा ॥ आप्सू ॥
दक्षागिराऽ२इष्ठाः । अथा ॥ दाशा ॥ स्वसारोअधिसानोऽ२ अव्याः ।
इडा ॥ श्याइनो ॥ नयोनिमाऽ२सदात् । अथा ॥ मा[illegible] ॥ [illegible] ।
वाऽ२३ ॥ इड्स्थिइडाऽ२३४५ ॥ ([illegible] । [illegible]) ([illegible] । ५०)

(३१।१) ॥ पार्जन्यो [illegible] [illegible] ॥

एआभी ॥ नवन्तआऽ२ । द्रुहाऽ३१उवाऽ२ । [illegible] ।
प्रियम् ॥ इन्द्रस्यकाऽ२ । मियाऽ३१उवाऽ२ । [illegible] ।
नपूर्वआऽ२ । युनियाऽ३१उवाऽ२ । [illegible] ॥ [illegible]
रिहन्तिमाऽ२ । तरआऽ३१उवाऽ२३ ॥ [illegible] ॥

([illegible] । ५१)

[[illegible]]
[illegible]

३२ धर्त्ता दिवः पवते० । (ऋ० ९ । ७६ । १; सा. ५५८, १२२८, ग्रा. गे. ११०७–११०८)

(३२।१) ॥ प्राजापत्याश्चत्वारः पदस्तोभाः गोतमा वा वैश्वामित्रावैन्द्राग्ना विश्वेदेवा वा । अष्टेडपदस्तोभमिदम् । (प्रथममिति वैदिकसंकेतः) ॥ प्रजापतिः जगती सोम

हाह। हौवाओऽ२३४वा । (द्वे त्रिः) । ए । औहोहोवाहाउ । वा । इडा । धर्त्तोदिवःपवतेकृत्व्योरसः । इडा ॥ इडा । दक्षोदेवानामनुमाद्योनृभिः । इडा ॥ इडा । हरिःसृजानोअत्योनसत्वभिः । इडा ॥ इडा । वृथापाजाꣳसिकृणुपेनदीपुवाऽ१ । हाह । हौवाओऽ२३४वा । (द्वे त्रिः) । ए । औहोहोवाहाउ । वा ॥ इडा ॥

(३२।२) ॥ षडिडपदस्तोभः (द्वितीयमिति वैदिकसंकेतः) गोतमः । (दी० ४७ । प० ३० । मा० १२)२५(बा । ५१)

हाउहाउहाउ । हौवाओऽ२३४वा । ए । औहोहोवाहाउ । वा । धर्त्तोदिवःपवा । इडा । तकृत्व्योरसः ॥ इडा । दक्षोदेवानामनुमाद्योनृभिः । इडा ॥ हरिःसृजानआ । इडा । त्योनसत्वभिः ॥ इडा । वृथापाजाꣳसिकृणुपेनदीपुवाऽ१ । हाउ(३) । हौवाओऽ२३४वा । ए । औहोहोवाहाउ । वा ॥ इडा ॥

(३२।३) ॥ चतुरिडपदस्तोभः (तृतीयमिति वैदिकसंकेतः)। विश्वामित्रः । (दी० ४४। प० २२ । मा० १४)२६(थी । ५२)

औहोहोवाऽ२ । ओवाऽ२ । ए । औहोहोवाहाउ । वा । धर्त्तोदिवःपवा । इडा । तकृत्व्योरसः ॥ दक्षोदेवानामा । इडा । नुमाद्योनृभिः ॥ हरिःसृजानआ । इडा । त्योनसत्वभिः ॥ वृथापाजाꣳसिकृ । इडा । औहोहोवाऽ२ । ओवाऽ२ । ए । औहोहोवाहाउ । वा ॥ णुपेनदीपुवाऽ१ ॥

(३२।४) ॥ द्विरिडपदस्तोभः (चतुर्थमिति वैदिकसंकेतः) ॥ इन्द्राग्नी वा । (दी० ४२ । प० २२ । मा० ६)२७(छू । ५४)

आऔहोवाहाइ । ए । औहोहोवाहाउ । वा । धर्त्ता । दीऽ२ । वःप । वा । कृत्व्यः ॥ रसः । दक्षोदेवानामनुमाद्योनृभिः । इडा ॥ हरिः । सा । नाअ । त्योन ॥ सत्वभिः । वृथापाजाꣳसिकृणुपेनदीपुवाऽ१ । आऔहोवाहाइ । औहोहोवाहाउ । वा ॥ इडा ॥

(दी० ३० । प० २३ । मा० १२)२८(बा । ५५)

॥ त्रयोदश चतुर्थः खण्डः ॥ ४ ॥

॥ इति (ग्रामे) आरण्यकगाने प्रथमः प्रपाठकः ॥ १ ॥

[...साम-तन्त्र-सूत्राणि] [५२]२५ [५३]२६(पृथक् सूत्राणि न सन्ति) पदस्तोभ आकण्ठये जिन्वन् १३.६.६;
...: २.१०.६; [५४]२७ स्येजो ५.२.१; [५५]२८ (...

३३ चर्षणीधृतं मघवानम्० । (ऋ० ३।५१।१; सा. ३७४; ग्रा. गे. ६४३)

(३३।१) ॥ दशसंसर्पाणि, महासर्पाणि, सर्पसामानि वा, सर्पम् । अथापरं वाभ्रवाणि चत्वारि अग्निर्जगतीन्द्रः । (तत्र प्रथममिदम्) ॥

अभाइमाहे । (त्रिः)। चर्षणीधृतंमघवानऽ३मूक्थ्याऽ१याऽ२म्॥ इन्द्रंगिरोबृहतीरभ्यऽ३नूषाऽ१ताऽ२॥ वावृधानंपुरुहूतꣳसुऽ३वाक्तीऽ१इभीऽ२ः॥ अमर्त्यंजरमाणंदिऽ३वाइदाऽ१इवेऽ२ । अभाइमाहे । (द्विः) । अभाऽ२३इ । माऽ२ । हाऽ२३४ । औहोवा॥ सर्पसुवाऽ२३४५ः ॥

(दी० १० । प० १४ । मा० १२)१(भा । ५६)

(३३।२) ॥ पृथिव्याश्च सर्पम् (प्रसर्पम्) । अथापरं वाभ्रवाणि चत्वारि पृथिवीजगतीन्द्रः । (तत्रद्वितीयमिदम्)॥

अभिप्रमꣳहिऽ३राइमाहे । (त्रिः) । चर्षणीधृतंमघवानऽ३मूक्थ्याऽ१याऽ२म् ॥ इन्द्राङ्गिरोबृहतीरभ्यऽ३नूषाऽ१ताऽ२॥ वावृधानंपुरुहूतꣳसुऽ३वाक्तीऽ१इभीऽ२ः ॥ अमर्त्यंजरमाणंदिऽ३वाइदाऽ१इवेऽ२ । अभिप्रमꣳहिऽ३राइमाहे ।(द्विः)। अभिप्रमꣳहिऽ३राऽ२३इ । माऽ२ । हाऽ२३४ । औहोवा॥ प्रसर्पसुवाऽ२३४५ः ॥

(दी० १० । प० १४ । मा० १२)२(भा । ५७)

(३३।३) ॥ वायोश्च सर्पम् (उत्सर्पम्) । किञ्च अथापरं वाभ्रवाणि चत्वारि वायुर्जगतीसोमः । (तत्र तृतीयमिदम्) ।

हाउहाउहाउवा । चर्षणीधृतंमघवानमुक्थ्यम्॥ हाउ(३)वा । इन्द्रंगिरोबृहतीरभ्यनूषत ॥ हाउ(३)वा । वावृधानंपुरुहूतꣳसुवृक्तिभिः॥ हाउ(३)वा । अमर्त्यंजरमाणन्दिवेदिवे । हाउ(३)वा॥ उत्सर्पसुवाऽ२३४५ः ॥

(दी० ११ । प० १६ । मा० १२)३(छै । ५८)

[साम-तन्त्र-सूत्राणि] [५६]१.७.३.२ (पूर्वस्तुति न इति) [५८]३ ... १३.४.६;
तैत्तिरीय ... १३.४.७;

३४ तवेदिन्द्रावमं वसु० । (ऋ० ७ । ३२ । १६; सा. २७०; ग्रा. गे. ४६६)

३५ अभि प्रियाणि पवते० । (ऋ. ९।७५।१; सा. ५५४,७००; ग्रा. गे. १०८९–१०९५)

(३४।१) ॥ अन्तरिक्षस्य सर्पम् अन्तरिक्षोवृहतीन्द्रः। किञ्च अथापरं ब्राह्मवाणि चत्वारि ।(तत्र तुरीयमिदम्

हाउ(३)वा । सुवस्स२ंसर्पन्तः । तवेदिन्द्रावमंवसु ॥ हाउ(३)वा । सुवस्स२ंसर्पन्तः । त्वंपुष्यासिमध्यमम् ॥ हाउ(३)वा । सुवस्स२ंसर्पन्तः । सत्राविश्वस्यपरमस्यराजसि ॥ हाउ(३)वा । सुवस्स२ंसर्पन्तः । नकिष्ट्वागोपुवृण्वते । हाउ(३)वा ॥ सुवस्स२ंसर्पन्तः । ए । सर्पतप्रसर्पतसुवर्गमेमसेवयम् ॥

(दी० १० । प० १६ । मा० २२)४(पा । ५९)

(३४।२) ॥ आदित्यम्, आदित्यस्य च सर्पम् आदित्योवृहतीन्द्रः । किञ्च अथापरं पावमानानि चत्वारि । (तत्र प्रथममिदम्) ॥

सुवस्स२ंसार्पस२ंसर्पाऽ२ । (द्विः) । सुवस्स२ंसार्पसम् । साऽ२ । पाऽ२३४ । औहोवा । तवेदिन्द्रावमंवसु ॥ त्वंपुष्यासिमध्यमम् ॥ सत्राविश्वस्यपरमस्यराजसि ॥ नकिष्ट्वागोपुवृण्वते । सुवस्स२ंसार्पस२ंसर्पाऽ२ । (द्विः) । सुवस्स२ंसार्पसम् । साऽ२ । पाऽ२३४ । औहोवा ॥ एऽ३ । सुवर्गममाऽ२३४५ ॥ (दी० १२ । प० १८ । मा० ३)५(जि । ६०)

(३५।१) ॥ दिवश्च सर्पम् द्यौर्जगती सूर्यः । किञ्च अथापरं पावमानानि चत्वारि । (तत्र द्वितीयमिदम्) ॥

सुपायप्रसु । पा । इहा । ईऽ३या । (चत्वारिस्त्रिः) । अभिप्रियाणिपवतेचऽ२नोहाऽ१हिताऽ२ः ॥ नामानियह्वोअधियेषुऽ३वाद्धाऽ१नाऽ२इ ॥ आसूर्यस्यबृहतोबृऽ३हानाऽ१धीऽ२ ॥ रथंविष्वंचमरुहद्विऽ३चाक्षाऽ१णाऽ२ः । सुपायप्रसु । पा । इहा । ईऽ३या । (चत्वारि त्रिः) । सुपायप्रसु । पा । इहा । ईऽ२ । याऽ२३४ । औहोवा ॥ ए । सुपायप्रसुपाय । (द्विः) । ए । सुपायप्रसुपायाऽ२३४५ ॥

(दी० २६ । प० ३६ । मा० ५)६ (क्रु । ६१)

[[illegible]] [illegible] ([illegible])

कुत्स आङ्गिरसः । पवमानः सोमः । त्रिष्टुप् । (ऋ० ९।९७।५८)

त्वया वयं पवमानेन सोम भरे कृतं वि चिनुयाम शश्वत् ।
तन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवी उत द्यौः ॥ ५९० ॥

३६ त्वया वयं पवमानेन सोम भरे कृतं वि चिनुयाम शश्वत् ।
तन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवी उत द्यौः ॥ ५

३७ स्वादोरित्था विषूवतः० । (ऋ. १।८४।१०; सा. ४०९, १००५; ग्रा. गे. ७१३

॥ अपां सर्पसाम । आपः त्रिष्टुप्सोमः लिङ्गोक्ता वा ॥

(३६।१)

सृपायप्रसृ । पा । ओहा । ईऽ३या । (चत्वारि त्रिः) । त्वयावयंपवमानेनसोमा ॥
भरेकृतंविचिनुयामशाश्वात् ॥ तन्नोमित्रोवरुणोमामहान्ताम् ॥ अदितिस्सिन्धुऽपृथिवीउ
सृपायप्रसृ । पा । ओहा । ईऽ३या । (चत्वारि द्विः) । सृपायप्रसृ ।
पा । ओहा । ईऽ२ । याऽ२३४ । औहोवा ॥ ए । सुवः । ए । सुवः । ए ।
सुवाऽ२३४५ः ॥ (दी० २३ । प० ३६ । मा० ७)

॥ समुद्रस्य सर्पसाम । समुद्रः त्रिष्टुप्सोमः लिङ्गोक्ता वा ॥

(३६।२)

सृपायप्रसृ । पा । ओहा । (त्रीणि त्रिः) । त्वयावयंपवमानेनसोमा ॥
भरेकृतंविचिनुयामशाश्वात् ॥ तन्नोमित्रोवरुणोमामहान्ताम् ॥ अदितिस्सिन्धुऽपृ
सृपायप्रसृ । पा । ओहा । (त्रीणि द्विः) । सृपायप्रसृ । पा । आऽ२ ।
हाऽ२३४ । औहोवा । सुवः । ए । सुवः । ए । सुवः । एऽ२३४५ ॥
(दी० २६ । प० ३० । मा

॥ मांड्वे द्वे, संसर्पे द्वे वा । द्वयोः मण्डुः पङ्क्तिरिन्द्रः ॥

(३७।१)

स्वादोरित्थाविषूवताएहाउ ॥ मधोऽपिबन्तिगौरियाएहाउ । याइन्द्रेणसया
वृष्णामदन्तिशोभथाएहाउ ॥ वस्वीरनुस्वराजियामऽ३हाउ । वा । ए ।
दिशऽप्रदिशऽक । पाऽ२ । ताऽ२३४ । औहोवा ॥ ए । राजंगमेमस्वरानं
(दी० २६ । प० १२ ।

(पृथक् सूत्राणि न सन्ति) [३७।१

३८ त्वमिन्द्र प्रतूर्तिष्वभि० । (ऋ. ८ । ९९ । ५; सा. ३११, १६३७; ग्रा. गे. ५२५)

३९ बण्महाँ असि सूर्य० । (ऋ. ८ । १०१ । ११; सा. २७६, १७८८; ग्रा. गे. ४७८)

वामदेवो गौतमः । विश्वे देवाः । एकपाज्जगती । (न ऋग्वेदीयः)

४० इमं वृषणं कृणुतैकमिन्माम् ॥ ५९१ ॥

(३७।२)

स्वादोरित्थाविषूवताओहाउ ॥ मधोऽ पिबन्तिगौरियाओहाउ । याइन्द्रेणसयावरीओहाउ ॥ वृष्णामदन्तिशोभथाओहाउ ॥ वस्वीरनुस्वराजियामोऽ३हाउ । वा । ए । उद्दिशोविदिशऽ क । पाऽ२ । ताऽ२३४ । औहोवा ॥ ए । विराजंगमेमस्वराजंगमेमाऽ२३४५ ॥

(दी० २७ । प० १३ । मा० १०)१० (जौ । ६५)

दश पञ्चमः खण्डः ॥ ५ ॥

(३८।१) ॥ त्रिगंधिम् । बृहत्साम रथन्तरम् वामदेव्य एवं रूपम् प्रजापतिःपथ्याबृहतीन्द्रः ॥

औहोइत्वामिन्द्रप्रतूर्त्तिषूऽ३ए ॥ अभाइवाइश्वाः । आसिस्थाऽ२३४द्धीः ॥ श्री ॥ आशस्तिहाजनितावृ । त्रतूऽ२३रसाइ ॥ श्री ॥ तुवाऽ२३०तूर्यो ॥ तरोहोऽ३ । हीम्माऽ२ ॥ ष्याऽ२तोऽ३५हाइ ॥

(दी० ७ । प० ९ । मा० ८)११ (झै । ६६)

(३९।१) ॥ यक्षसारथिप्रजापतिर्बृहती सूर्यः ॥

एवाणमा ॥ हाँ असिसूऽ२रिया । इडा । बृ । हाउवा । आथा ॥ वाडा ॥ दित्यमहाँऽ२असाइ । इडा । हरिः । हाउवा । आथा ॥ माहः ॥ तेसतोमहिमापनाऽ२इष्टमा । इडा । मातिः । हाउवा । आथा ॥ माह्वा ॥ देवमहाऽ२ँ असाइ ॥ इडाऽ२३४५ ॥

(दी० ५ । प० २१ । मा० १२)१२ (पा । ६७)

(४०।१) ॥ वृषाप्रजापतिरेकपदात्रिष्टुब् विश्वेदेवाः ॥

इमाआवा । (त्रिः) । इमाऽ३ । ओइ । इमाऽ३ । ओइ । इमाऽ३ । ओऽ२३४वा ॥ वृषाआवा । (त्रिः) । वृषाऽ३ । ओइ । (द्वे द्विः) । वृषाऽ३ । ओऽ२३४वा । णंकृणावता । एकाआवा । (त्रिः) । एकाऽ३ । ओइ । (द्वे द्विः) । एकाऽ३ । ओऽ२३४वा ॥ इन्माऽ२३४५म् ॥

(दी० ३५ । प० २९ । मा० १६)१३ (भू । ६८)

[साम-तन्त्र-सूत्राणि] [६५]१० [६६]११ (पृथक् सूत्राणि न सन्ति) [६७]१२ बृ सारथि निहाउवायाम् १३.११.३।

[६८]१३ तं ८.५.६; पंक्तु १०.४.४; अस्मिन् साम्नि प्रतिहारविभागः " एकं त्रया त्रिरुक्तायम् " " ओवान्तो वा नव स्तः " इति प्रतिहारसूत्रोक्तः ।(१.११.२९,३०) द्रष्टव्यः ।

४१ य एक इद्विदयते० । (ऋ. १।८४।७; सा. ३८९, १३४१; ग्रा. गे. ६७४-६७६)

४२ यो न इदमिदं पुरा० । (ऋ. ८।२१।९; सा. ४००; ग्रा. गे. ६९६-६९७)

४३ अभ्रातृव्यो अनात्वम्० । (ऋ. ८।२१।१३; सा. ३९९, १३८९; ग्रा. गे. ६९५)

(४१।१) × ॥ एकवृष प्रजापतिरुष्णिगिन्द्रः ॥

हाहिम् । (त्रिः) । योवा । (त्रिः) । योवाहाइ । (त्रिः) । यएकइद्विदयत । एकंऽसमेरयद्वृषे ॥ वसुमर्त्तायदाशुषे । एकंऽसमेरयन्मह ॥ ईशानाअप्रतिष्कुतः । एकोवृषाविराजति ॥ इन्द्रोअंग । हाहिम् । (त्रिः) । योवा । (त्रिः) । योवाहाइ । (त्रिः) । योवाऽ२हाउ । वाऽ३ । ईऽ२३४५ ॥

(दी० ५९ । प० ३७ । मा० १७)१४ (थ्रे । ६९)

(४२।१) ॥ विद्रथप्रजापतिः ककुबिन्द्रः ॥

होवाहाइ । योनः ॥ होवाहाइ । (त्रिः) । ओहोवाहाइ । (त्रिः) । इदामि । (त्रिः) । पुराए । होवाहाइ । (त्रिः) । ओहोवाहाइ । (त्रिः) । प्रवाए । स्यजाए । निनाए । होवाहाइ । (त्रिः) । ओहोवाहाइ । (त्रिः) । यतामि । उचाए । स्तुषाए ॥ होवाहाइ । (त्रिः) । ओहोवाहाइ । (त्रिः) । सखाए । यआए । द्रमूए । तयाए । होवाहाइ । (त्रिः) । ओहोवाहाइ । (त्रिः) । ओहोवाऽ२हाउ । वाऽ३ ॥ हस्तस्थिघ्नहस्मनाऽ२३४५ः ॥

(दी० ८९ । प० ४३ । मा० ४६)१५ (धृ । ७०)

(४३।१) ॥ अभ्रातृव्यम् (भ्रातृव्यम् वा) प्रजापतिः ककुबिन्द्रः ॥

हाउहाउहाउ । हुवेविराजःऽस्वराजन् । (त्रिः) । हाओवा । (त्रिः) । हाऽ३ओऽ२३४वा । (त्रिः) । हाउवा । महत्सामजीजन । अभ्रातृव्योअनात्वम् ॥ महद्भद्रमजीजन । अनापिरिन्द्रजनुषासनाद ॥ स्वभ्रातृव्यमजीजन । युधेदापित्वमिच्छसे ॥ हाउ(३) । हुवेविराजःऽस्वराजन् । (त्रिः) । हाओवा । (त्रिः) । हाऽ३ओऽ२३४वा । (त्रिः) । हाउ(३)वाऽ३ ॥ एऽ३ । ओनिमृत्सीऽ२३४५ ॥

(दी० ५४ । प० ३८ । मा० २०)१६ (दे । ७१)

[साम-तन्त्र-सूचना]: [illegible]

× [illegible] [[illegible]]

अमहीयुराङ्गिरसः । पवमानः सोमः । गायत्री । (ऋ० ९।६१।१२-११)

स न इन्द्राय यज्यवे वरुणाय मरुद्भ्यः । वरिवोवित्परि स्रव ॥ ५९२ ॥

एना विश्वान्यर्य आ द्युम्नानि मानुषाणाम् । सिषासन्तो वनामहे ॥ ५९३ ॥

४४ रेवतीर्नः सधमादे० । (ऋ. १।३०।१३; सा. १५३, १०८४; ग्रा. गे. २५९)

४५ उच्चा ते जातमन्धसः० । (ऋ. ९।६१।१०; सा. ४६७, ६७२; ग्रा. गे. ८१४-८२६)

४६ स न इन्द्राय यज्यवे वरुणाय मरुद्भ्यः । वरिवोवित्परिस्रव ॥ ५९२ ॥

४७ एना विश्वान्यर्य आ द्युम्नानि मानुषाणाम् । सिषासन्तो वनामहे ॥५९३

(४४।१) ॥ रैवते द्वे । द्वयोः प्रजापतिर्गायत्रीन्द्रः ॥

हाउरेवा ॥ तीर्नाः । इहा । सधमादाऽ२ । हाऽ३१उवाऽ२३ ॥ ईऽ३४डा ॥

इन्द्राऽ२इसन्तू ॥ इहा । तुविवाजाऽ२ः । हाऽ३१उवाऽ२३ ॥ ईऽ३४डा ॥

क्षुमाऽ२न्ताया ॥ इहा । भिर्मदेमाऽ२ । हाऽ३१उवाऽ२३ ॥ ईऽ३४डा ॥

(दी० ५ । प०.१६ । मा० ७)१७ (पे । ७१

(४४।२)

रा ॥ वताऽ२इः । नाः । इहा । औहोहो । इडा । सधाऽ२ । मादाइ । इहा ।

औहोहो । इडा ॥ इन्द्राऽ२इ । सन्तू । इहा । औहोहो । इडा ॥

तुवाऽ२इ । वाजाः । इहा । औहोहो । इडा ॥ क्षुमाऽ२ ।

तोया । इहा । औहोहो । इडा ॥ भिर्म्माऽ२ । देमा । इहा । औहोहो । इडा ॥

एरा । एवृ । एरेऽ२३४५ ॥ (दी० ११ । प० ३४ । मा० ७)१८(धे । ७३

(४५-४७।१) ॥ शाक्करवर्णम् । शाक्करवर्णो गायत्री सोमः ॥

एउच्चा ॥ तेजातमन्धसोदिविसद्भूमियाऽ२ददाइ । इडा । उग्रꣳशर्ममहाऽ१इश्राऽ३वाः ॥ श्री ॥

सानः ॥ इन्द्रायज्यवेवरुणायमरूऽ२द्भियाः । इडा । वरिवोवित्पराऽ१इस्राऽ३वा ॥ श्री ॥

आइना । विश्वान्यर्यआद्युम्नानिमानुषाऽ२णाम् । इडा ॥ सिषासन्तोवनाऽ२३होइ ॥

माहाऽ३१उवाऽ२३ ॥ हुंस्थिइडाऽ२३४५ ॥ (दी० १४ । प० १४ । मा० १३)१९(धि । ७४)

[साम-तन्त्र-सूत्राणि][७२]१७[७३]१८[७४]१९ (पृथक् सूत्राणि न सन्ति)

अया रुचा हरिण्या० । (ऋ० ९।१११।१; सा. ४६३, १५९०; ग्रा. गे. ८०५-८०७)
४८ अभि त्वा शूर नोनुमः० । (ऋ. ७।३२।२२; सा. २३३, ६८०; ग्रा. गे. ३७७-३७८)
४९ त्वामिद्धि हवामहे० । (ऋ. ६।४६।१; सा. २३४, ८०९; ग्रा. गे. ३७९-३८०)
५०

॥ नित्यवत्सा (नित्यवत्सम्) प्रजापतिरत्यष्टिस्सोमः ॥

(४८।१)

एआया ॥ रुचाहरिण्यापुनानोविश्वाद्वेषाꣳसितरतिसयूऽ२ग्वभाइः । इडा । धारा ॥ पृष्ठस्यरोऽ२चताइ । इडा ॥ धारा ॥ स्रानसयूऽ१ग्वाऽ३भीः ॥ धारा ॥ पृष्ठस्यरोऽ२चताइ । इडा । पुनानोअरुषोऽ१हाऽ३रीः । पृष्ठस्यरोऽ२चताइ । अथा ॥ धारा ॥ पृष्ठस्यरोऽ२चताइ । सप्तास्येभिराऽ२३हों । काभिराऽ३१उवाऽ२३ । विश्वायद्रूपापरियासियाऽ३ । कामीः । सप्तास्येभिराऽ२३हों । काभिराऽ३१उवाऽ२३ । (दी० १७ । प० १९ । मा० १२)२०(झा । ७५)
इट्स्थिइडाऽ२३४५ ॥

॥ वसिष्ठस्य च रथन्तरम् । वसिष्ठो बृहतीशानेन्द्रौ ॥

(४९।१)

अभित्वाशूरनोनुमोवा ॥ आदुग्धाइवधेनवईशानमस्यजगतः । सुवाऽ२३र्दृशाम् ॥ आइशानमाऽ२३इन्द्राऽ३ ॥ तास्थूऽ२३४षा । ओवाऽ६ । हाउवा ॥ अस् ॥ (दी० १० । प० ८ । मा० ८)२१(वै · ७६)

॥ जमदग्नेश्च सप्तहम् । जमदग्निः बृहतीन्द्रः ॥

(५०।१)

अयंवायाउ । (त्रिः) । त्वामिद्धाइ । हावामहाइ ॥ (त्रिः) । सातौवाजा । स्याकारवाः ॥ (त्रिः) । त्वांवृत्राइ । पूइन्द्रसात् । पातिंनराः ॥ (त्रिः) । त्वांकाष्ठा । सूअवर्ताः । (त्रिः) । अयंवायाउ । (द्विः) । अयम् । वाऽ२ । याऽ२३४ । ओहावा ॥ ए । त्रिवृतंप्रवृतम् । (द्वे द्विः) । ए । त्रिवृतंप्रवृताऽ२३४५म् ॥ (दी० ३१ । प० ३२ । मा० २८)२२(खं ७७)

॥ द्वादश पद्यः खण्डः ॥ ६ ॥

[७५]२०[७६]२१ (पृथक् सूत्राणि न सन्ति) [७७]२२ तम् १२.१

[साम-तन्त्र-सूत्राणि]
गीताये नन्दायाम् ११.२.३;

॥ पञ्चपविमन्ति (महासामानि) रुद्रसूक्तम् । रुद्रस्त्रिष्टुबिन्द्रः ॥

आक्रन्दयं कुरु घोषमहान्तꣳ हरीइन्द्रस्याभियोजयाशू ।

मर्माविधन्ददतामन्य अन्यꣳशल्यात्मापततुश्लोकमच्छ ।

प्रयत्नक्रमराव्णे सनता अभ्यवर्त्तयत् । ज्योगित्तिस्र आहातिशयातिकेशवच्छिरः ॥

(स्वरितम् २ । उदात्तम् २ । धरि१५)१३(छु । ७८)

आ । क्रन्दय । कुरु । घोषम् । महान्तम् ॥ हरीइति । इन्द्रस्य । अभि ।

योजय । आशूइति ॥ मर्माविधम् । मर्म । विधम् । ददताम् । अन्यः ।

अन्य । ... । अन्यम् । अनु । गं ॥ शल्यात्मा । शल्य । आत्मा । पततु ।

श्लोकम् । अच्छ ॥ प्र । यत् । चक्रम् । अराव्णे । अ । राव्णे ॥ सनतं ।

अभ्यवर्त्तयत् । अभि । अवर्त्तयत् ॥ ज्योक् । इत् । तिस्रः । आहाति ॥

शयाति । केशव । शिरः ॥ (अनुदात्तम् ११ । अवग्रहम् ६ । पदम् ४३)१४(कि । ७९)

॥ पञ्च पविमन्ति महासामानि (तत्र प्रथमिदं)। शर्वस्य प्रथमोत्तमे (तत्र प्रथममिदं) । अथापरमेर्शर्वस्य द्वे (तत्राद्यमिदम्) शर्वस्त्रिष्टुबिन्द्रः॥

... कुरुघोषमहाऽ२ । आन्ताऽ२म् । हरीइन्द्रस्याभियोजयाऽ२ ।

... मर्माविधंददतामन्याऽ२ । आन्याऽ२म् ॥ शल्यात्मापततुश्लोकमाऽ२३ ।

... । ...ऽ२३४ । औहोवा ॥ अस्म ॥ (...१२ । ...१२ । ...) १५(छी । ८०)

॥ पञ्च पविमन्ति महासामानि । (तत्र द्वितीयमिदं) रुद्रस्य त्रीणि (तत्राद्यमिदम) । अथेर्शर्वस्य द्वे (तत्र द्वितीयमिदम) रुद्रो अनुष्टुबिन्द्रः ॥

... । अस्म (त्रिः) । फट् । (त्रिः) । भुवम् (त्रिः) । हम् । (त्रिः) ।

... । ... । ...ऽ२ । आर्चाऽ२ ॥ गानाऽ२ । ताअऽ२ ।

... । ... । ... । ... । ...ऽ२ । हानाऽ२ ।

... । ... । ... । ... । हाऽउहाऽउहाऽ । अस्म । (त्रिः) ।

... । ... । ... (त्रिः) । हम् । (त्रिः) । हाऽ२३४ । औहोवा ।

... । ... । ... । ... । ...ऽ२३४५ ॥ (...) १६(... । ८१)

... (...) [...]

...

अभि त्वा शूर नोनुमः० । (ऋ. ७।३२।२२; सा. २३३,६८०; ग्रा. गे. ३७७-३७८)

॥ पञ्च पविमन्ति महासामानि (तत्र तृतीयमिदं)। रुद्रस्य त्रीणि

(तत्र द्वितीयमिदं)। क्षुरस्य हरसी द्वे (तत्र प्रथममिदं) रुद्रोऽनुष्टुबिन्द्रः ॥

१) ...यामूः । (त्रिः) । प्रायऽ२त् । चक्रम्ऽ२ । आराऽ२ । आण्णाऽ२ह् ॥ (त्रिः) ।

...नऽ२ । ताअऽ२ । भ्यावऽ२ । तायऽ२त् ॥ (त्रिः) । जीयोऽ२क् । इत्तिऽ२ ।

...त्राआऽ२ । हातेऽ२ । (त्रिः) । शायाऽ२ । तकऽ२ । शावऽ२त् ।

...शाइरऽ२ः । (त्रिः) । अस्यामूः । (द्विः) । अ । भ्याऽ२ । भूऽ२३४ ।

ओहोवा । हस्थिप्रहस्थिएऽ३चक्षूऽ२३४५ः ॥ (दी० ३५ । प० ३४ । मा० २६)२७(भू । ८२)

॥ पञ्च पविमन्ति महासामानि (तत्र चतुर्थमिदं)। रुद्रस्य त्रीणि

(५१।६) (तत्र तृतीयमिदं)। क्षुरस्य हरसी द्वे (तत्र द्वितीयमिदम्) रुद्रोऽनुष्टुबिन्द्रः ॥

हाउहाउहाउ । क्षुरोहरोहरोहरः । (त्रिः) । वृश्चप्रवृश्चप्रच्छिन्धि । (त्रिः) ।

हाउहाउहाउवा । प्रयच्चक्रमराण्णे ॥ सनताअभ्यवर्त्तयत् ॥ ज्योगित्तिसओहाते ॥

शयातेकेशवाच्छिरः । हाउहाउहाउ । क्षुरोहरोहरोहरः । (त्रिः) ।

वृश्चप्रवृश्चप्रच्छिन्धि । (त्रिः) । हाउ(३)वा ॥ ए । वृश्चप्रवृश्चप्रच्छिन्धि ।

(द्वे द्विः) । ए । वृश्चप्रवृश्चप्रच्छिन्धीऽ२३४५ ॥ (दी० ३७ । प० २६ । मा० २२)२८(चा । ८३)

पञ्च पविमन्ति महासामानि (तत्र पञ्चममिदं)। शार्वस्य प्रथमोत्तमे

(५१।१) (तत्रोत्तममिदं)। मृत्योर्हरः लोकानां शान्तिरुत्तम(रोम) ॥

हाउहाउहाउ । वयोवृहद्दत ऽहविर्भद्रा ऽस्वधा ऽस्वय ऽस्कृण्वइपमृज ऽरजःसुवः । हिम् । (त्रिः

हो । (त्रिः) । हऽ । (द्विः) । हऽऽ२३४ । ओहोवा । अभित्वाशूरनोनुमोहस् ॥

अदुग्धाइवधेनवोहस् ॥ ईशानमस्यजगतस्स्वर्दृश ऽहम् ॥ ईशानमिन्द्रतस्थुषोहस् ।

हाउहाउहाउ । वयोवृहद्दत ऽहविर्भद्रा ऽस्वधा ऽस्वय ऽस्कृण्वइपमृज ऽरजःसुवः । हिम् । (त्रिः

हो । (त्रिः) । हऽ । (द्विः) । हऽऽ२३४ । ओहोवा ॥ ए । वाक् । ए ।

इडा । ए । सुवः । ए । वृहत् । ए । भाः । ए । अकमन्तदेवाहृथ ऽहम् ॥

(दी० ४१ । प० ४० । मा० ३६)२९(...)

[८३]२८ ... (...)

[साम-तन्त्र-सूत्राणि] [८२]२७ (...)

[८४]२९ आर्षेय० ... ११.३.६;

सा० ... ४२

९३ कया नश्चित्र ॥ (ऋ. ४।३१।१; सा. १६९, ६८२; प्रा. गे. ३०४-३०६)

॥ पञ्चनिधनं वामदेव्यम् । वामदेवो गायत्री विश्वेदेवाः ॥

(९३।१)

होवाऽ३हाऽ३ । आऽ२इ । हियाऽ२३४५ । हाउहाउहाउ । एहियाहाउ । (द्विः) । होवाऽ३हाऽ३ । आऽ२इ । एहियाऽ३४ । औहोवा । इहप्रजामिहरयिꣳरराणोहस् । होवाऽ३हाऽ३ । आऽ२इ । हियाऽ२३४५ । हाउहाउहाउ । एहियाहाउ । (त्रिः) । कयानश्चाइ । त्रआऽ२भूऽ२३४वात् ॥ हियाऽ२३४५ । हाउहाउहाउ । एहियाहाउ । (द्विः) । होवाऽ३हाऽ३ । आऽ२इ । हियाऽ२३४५ । हाउहाउहाउ । एहियाहाउ । (द्विः) । होवाऽ३हाऽ३ । आऽ२इ । एहियाऽ३४ । औहोवा । रायस्पोषायसुक्रतायभूयसेहस् । होवाऽ३हाऽ३ । आऽ२इ । हियाऽ२३४५ । हाउहाउहाउ । एहियाहाउ । (त्रिः) । ऊताइसदा । वाद्धूऽसाऽ२३४खा ॥ होवाऽ३हाऽ३ । आऽ२इ । हियाऽ२३४५ । हाउहाउहाउ । एहियाहाउ । (द्विः) । एहियाऽ३४ । औहोवा । आगन्वाममिदंवृहद्धस् । होवाऽ३हाऽ३ । आऽ२इ । हियाऽ२३४५ । हाउहाउहाउ । एहियाहाउ । (त्रिः) । होवाऽ३हाऽ३ । आऽ२इ । हियाऽ२३४५ । कयाशचाइ । ष्ठयाऽ२वाऽ२३४र्त्ता ॥ होवाऽ३हाऽ३ । आऽ२इ । हियाऽ२३४५ । हाउहाउहाउ । एहियाहाउ । (द्विः) । एहियाऽ३४ । औहोवा । इदंवाममिदंवृहद्धस् । होवाऽ३हाऽ३ । आऽ२इ । हियाऽ२३४५ । हाउहाउहाउ । एहियाहाउ । (त्रिः) । होवाऽ३हाऽ३ । आऽ२इ । हियाऽ२३४५ । कयाशचाइ । ष्ठयाऽ२वाऽ२३४र्त्ता । होवाऽ३हाऽ३ । आऽ२इ । हियाऽ२३४५ । हाउहाउहाउ । एहियाहाउ । एहियाहाउ । एहियाऽ३४ । औहोवा ॥ चराचरायवृहतइदंवाममिदंवृहद्धस् ॥

(दी० १२७ । प० ८१ । मा० ७०)३०(चौ । ८९)

[साम-तन्त्र-सूत्राणि][८९]३० तालव्ये न तोकात् १३.५.२; इह १३.५.९; पोषा स्वः प सधीकव्यकल्पन्तानाम् व्यन्तान्तरिक्षे १३.८.१;

(ऋ. ७।२२।१; सा. ३९८, ९२७; मा. गे. ६९३-६९४)

५४ पिबा सोममिन्द्र० ।

॥ इन्द्रस्य महावैराज्यं वसिष्ठस्य वा । इन्द्रो विराडिन्द्रः ॥

(५४।१) हाइयाहाइयाहाइयाऽ३४३पिब ॥ मत्स्वाहाउ । ओजोहाउ । सहोहाउ । बलꣳहाउ ।
इन्द्रोहाउ । वयोहाउ । वृहद्धाउ । ऋतꣳहाउ । स्वर्हाउ । ज्योतिर्हाउ ।
दाऽ३ये । हाउहाउहाउ । औहोऽ१इ । (त्रिः) । सोमाम् । इन्द्रमा । दतुत्वा । (त्रिः) ।
हाउहाउहाउ । औहोऽ१इ । (त्रिः) । पिबासोमाम् । इन्द्रमा । दतुत्त्वा । (त्रिः) ।
हाउहाउहाउ । औहोऽ१इ । (त्रिः) । पिबासोमाम् । इन्द्रमा । द तुत्वा । (त्रिः) ।
मत्स्वाहाउ । ओजोहाउ । सहोहाउ । बलꣳहाउ । इन्द्रोहाउ । वयोहाउ ।
वृहद्धाउ । ऋतꣳहाउ । स्वर्हाउ । ज्योतिर्हाउ । दाऽ३ये । हाउहाउहाउ ।
औहोऽ१इ । (त्रिः) । यन्तसुपा । वाहरिया । श्वाद्रिऽ२ः । श्वाद्रिऽ२ः । श्वाद्रिः ।
हाउहाउहाउ । औहोऽ१इ । (त्रिः) । यन्तसुपा । वाहरिया । श्वाद्रिऽ२ः ।
श्वाद्रिऽ२ः । श्वाद्रिः । हाउहाउहाउ । औहोऽ१इ । (त्रिः) । यन्तसुपा ।
वाहरिया । श्वाद्रिऽ२ः । श्वाद्रिऽ२ः । श्वाद्रिः । मत्स्वाहाउ ।
ओजोहाउ । सहोहाउ । बलꣳहाउ । इन्द्रोहाउ । वयोहाउ । वृहद्धाउ ।
ऋतꣳहाउ । स्वर्हाउ । ज्योतिर्हाउ । दाऽ३ये । हाउहाउहाउ । औहोऽ१इ । (त्रिः) ।
सोतुवाहू । भ्याꣳसुयतो । नावाऽ२ । नावाऽ२ । नावा । हाउहाउहाउ ।
औहोऽ१इ । (त्रिः) । सोतुवाहू । भ्याꣳसुयतो । नावाऽ२ । नावाऽ२ । नावा ॥
हाउहाउहाउ । औहोऽ१इ । (त्रिः) । सोतुवाहू । भ्याꣳसुयतो । नावाऽ२ ।
नावाऽ२ । नावा ॥ सधमे । सधमे । साधाऽ३माइ । ऋतम । ऋतम ।
आवोऽ३माइ । इयाहाउ । इयाहाउ । इयापिबमत्स्वाऽ३ । हाउवाऽ३ ॥ इऽ२३४५ ॥

([illegible] ६६४ । [illegible] ६२६ । [illegible] ६०४)३२([illegible])" [illegible])

[साम-तन्त्र-सूत्राणि] [८६]३१ ([illegible]) [illegible] ([illegible])

* अत्र [illegible]

५५ अग्न आ याहि वीतये० । (ऋ. ६।१६।१०; सा. १, ६६०; ग्रा. गे. १-३)

५६ कया नश्चित्र: ० । (ऋ. ४।३१।१; सा. १६९, ६८२, ग्रा. गे. ३०४-३०६)

आत्मा । अन्नम् । त्रिष्टुप् । (न ऋतुनेदीयः)

५७ अहमस्मि प्रथमजा ऋतस्य पूर्वं देवेभ्यो अमृतस्य नाम ।
यो मा ददाति स इदेवमावदहमन्नमन्नमदन्तमद्मि ॥ ५९४ ॥

(५५।१)　　॥ अग्नेश्च प्रियम् । अग्निर्गायत्र्यग्निः ॥

हाउहाउहाउ । प्रियहोइ । (त्रिः) । प्रियमोइ । (त्रिः) । अग्नआयाहिऽ३वाइताऽ१याऽ२इ॥
गृणानोहव्यऽ३दाताऽ१याऽ२इ॥ निहोतासत्सिऽ३बार्हीऽ१इषीऽ२३ ॥ हाउहाउहाउ ।
प्रियहोइ । (त्रिः) । प्रियमोइ । (द्विः) । प्रि । याऽ२म् । आऽ२३४ ।
औहोवा ॥ ए । प्रियम् । (द्वे त्रिः ।) । ए । ब्राह्मणानांयन्मनस्तन्मयिब्राह्मणानाम् ।
ए । पशूनांयन्मनस्तन्मयिपशूनाम् । ए । योपितांयन्मनस्तन्मयियोपिताऽ२३४५म् ॥

(दी० ३३ । प० ३२ । मा० २९)३२(ठो । ८७)

(५६।१)　　॥ सर्पं साम कल्माषं वा वामदेव्यम् । प्रजापतिर्गायत्री विश्वेदेवाः ॥

वीहायवाइ । (त्रिः) । वीहायवाइ । (त्रिः) । कयानश्चाइ । त्रआऽ२भूऽ२३४वात् ॥
ऊताइसदा । वार्द्धस्साऽ२३४खा॥ कयाशचाइ । ष्ठयाऽ२वाऽ२३४र्त्ता ॥
वीहायवाइ । (त्रिः) । वीहायवाइ । (द्विः) । वीहा । याऽ२ । वाऽ२३४ ।
औहोवा ॥ ए । संयमन्नन्यायमन्वियमन्नसमायमन्०स्थियर्केचोदरसर्पिणस्तेभ्योनमाऽ२३४५: ॥

(दी० ३७ । प० २३ । मा० १८)३३(जै । ८८)

(५७,१)　　॥ स्वर्ग्यम्, सेतुषाम पुरुषगतिर्वा, विशोकं वा । प्रजापतिस्त्रिष्टुबात्मा ॥

हाउहाउहाउ । सेतूंस्तर । (त्रिः) । दुस्त । रान् । (द्वे त्रिः) । दानेनादानम् । (त्रिः) ।
हाउहाउहाउ । अहमास्मिप्रथमजाऋताऽ२३स्याऽ३४५ ॥ हाउहाउहाउ ।
सेतूंस्तर । (त्रिः) दुस्त । रान् । (द्वे त्रिः) । अक्रोधनक्रोधम् । (द्विः) ।
अक्रोधनक्रोधम् । हाउहाउहाउ । पूर्वंदेवेभ्योअमृतस्यनाऽ२३माऽ३४५ ॥

[साम-तन्त्र-सूत्राणि] [८७]३२ त्रिवृतः ७.६.८;　　　[८८]३३ (पृथक् सूत्राणि न सन्ति)

श्रद्धयाश्रद्धाम् । (त्रिः) । दुस्त । रान् । (द्वे त्रिः) ।
हाउहाउहाउ । सनूंस्वर । (त्रिः) । हाउहाउहाउ । सनूंस्वर । (त्रिः) ।
हाउहाउहाउ । योमाददातिसइदेवमा२३वा३४५व् । हाउहाउहाउ ।
दुस्त । रान् । (द्वे त्रिः) । सत्येनानृतम् । (त्रिः) । एणागतिः । (त्रिः) ।
अहमन्नमन्नमदन्तमा२३ग्रो३४५ । हाउहाउहाउवा ॥ ज्योतिर्गच्छ । (त्रिः) ।
एतदमृतम् । (त्रिः) । स्वर्गच्छ । (त्रिः) । (धा । ८९)
सनूंस्तोत्वोचतुरा२३४५: ॥

(द्वे० १०६ । प० ७४ । मा० ६२)३४

[अर्कपर्वणि ८९ सामानि]

॥ सप्तमः खण्डः ८७ ॥

॥ इति [illegible] ॥

॥ इति अर्कनाम प्रथमं पर्व समाप्तम् ॥

[illegible] ११. ८ .

[...]ान-तन्त्र-सूत्राणि][८९.]३४ [illegible] ११.५.७; [illegible] ११.६.३; [illegible]

अथ द्वन्द्व-पर्व ।

५८ इन्द्रं नरो नेमधिता० । (ऋ० ७।२७।१; सा. ३१८; प्रा. गे. ५४०)

(५८।१) ॥ वासिष्ठस्य प्राणापानौ द्वौ । वासिष्ठस्त्रिष्टुविन्द्रः ॥

हाउहाउहाउ । (निश्वसेत् । त्रिः) । आयुः । (त्रिः) । सात्यम् । (त्रिः) ।
इन्द्रन्नरो । नेऽ३मधि । ताहवन्ताइ ॥ यत्पारियाः । युनज । ताइधियस्ताः ॥
शूरोनृषा । ताऽ३श्रव । सश्चकामाइ ॥ आगोमताइ । व्रजेभ । जातुवन्नाः ।
हाउहाउहाउ । (निश्वसेत् । त्रिः) । आयुः । (त्रिः) । सात्यम् । (द्विः) ।
सत्याऽ३४ । औहोवा ॥ ईऽ२३४५ ॥ (दी० २८ । प० ३४ । मा० २४)१(द्री । १०)

(५८।२)

हाउहाउहाउ । (उच्छ्वसेत् । त्रिः) । आनोहिय । (त्रिः) । मनदोहम् । (त्रिः) ।
इन्द्रन्नरो । नेऽ३मधि । ताहवन्ताइ ॥ यत्पारियाः । युनज । ताइधियस्ताः ।
शूरोनृषा । ताऽ३श्रव । सश्चकामाइ ॥ आगोमताइ । व्रजेभ । जातुवन्नाः ।
हाउ(३) । (उच्छ्वसेत् । त्रिः) । आनोहिय । (त्रिः) । मनदोहम् । (द्विः) ।
मनाऽ२३दोहाऽ३४ । औहोवा ॥ ईऽ२३४५ ॥ (दी० ३५ । प० ३४ । मा० १८)२ (श्रै । ११)

(५८।३) ॥ इन्द्रस्यैन्यौ द्वौ । इन्द्रस्त्रिष्टुविन्द्रः ॥

हाउ(३) । एन्यौ । (त्रिः) । एन्याहाउ । (त्रिः) । इन्द्रन्नरो । नेऽ३मधि ।
ताहवन्ताइ ॥ यत्पारियाः । युनज । ताइधियस्ताः ॥ शूरोनृषा । ताऽ३श्रव ।
सश्चकामाइ ॥ आगोमताइ । व्रजेभ । जातुवन्नाः । हाउ(३) । एन्यौ । (त्रिः) ।
एन्याहाउ । (द्विः) । एन्याऽ२हाउ । वाऽ३ ॥ ईऽ२३४५ ॥
(दी० ३८ । प० २८ । मा० १९)३(द्रो । १२)

[साम-तन्त्र-सूत्राणि][१०]१ प्राणे स प्रथमे ८.६.२; [११]२[१२]३ (पृथक् सूत्राणि न सन्ति)

(५८।४)
हाउहाउहाउ । आहोएन्यो । (त्रिः) । आहोऽ२एन्याउ । (त्रिः) । इन्द्रन्नरो ।
नेऽ३मधि । ताइवन्ताइ ॥ यत्पारियाः । युनज । ताइधियस्ताः ॥ शूरोनृषा ।
ताऽ३श्रव । सश्वकामाइ ॥ आगोमताइ । व्रजेभ । जातुवन्नाः । हाउ(३) ।
आहोएन्यो । (त्रिः) । आहोऽ२एन्याउ । (द्विः) । आहोऽ२एन्याऽ३हाउ ।
वाऽ३ ॥ ईऽ२३४५ ॥ (दी० ५१ । प० २८ । मा० ३१)४(ग्र । ९३)

×॥ प्रजापतेर्व्रतपक्षौ द्वावहोयाजयोर्वा । प्रजापतिस्त्रिष्टुबिन्द्रः ॥

(५८।५)
हाउ(३) । हुंहुंहुं । (त्रिः) । हाउ (३) । इन्द्रन्नरो । नेऽ३मधि । ताइवन्ताइ ॥
यत्पारियाः । युनज । ताइधियस्ताः ॥ शूरोनृषा । ताऽ३श्रव । सश्वकामाइ ॥
आगोमताइ । व्रजेभ । जातुवन्नाः । हाउहाउहाउ । हुंहुंहुं । (त्रिः) ।
हाउहाउहाउ । वाऽ३ ॥ ईऽ२३४५ ॥ (दी० १८ । प० २४ । मा० १९)५(ह्री । ९४)

(५८।६)
हाउहाउहाउ । इहा । हुंहुंहुं । (द्वे त्रिः) । हाउहाउहाउ । इन्द्रन्नरो । नेऽ३मधि ।
ताइवन्ताइ ॥ यत्पारियाः । युनज । ताइधियस्ताः ॥ शूरोनृषा । ताऽ३श्रव ।
सश्वकामाइ ॥ आगोमताइ । व्रजेभ । जातुवन्नाः । हाउहाउहाउ । इहा ।
हुंहुंहुं । (द्वे त्रिः) । हाउहाउहाउ । वाऽ३ ॥ ईऽ२३४५ ॥ (दी० १८ । प० ३० । मा० १९)६(घो । ९५)

॥ इन्द्राण्या उदक्षेनरासुर्पी द्वे । अहोयामयोरिन्द्राणी त्रिष्टुबिन्द्रः ॥

(५८।७)
हाविन्द्राम् ॥ नरानमधिवाह । वाऽ२ऽ१ । वाऽ२इ । यात्पाऽ२ । याधुनन्नवाधि ।
नाऽ२ऽ१ः । ताऽ२ः ॥ शूरोऽ२ । नृषाताश्रवसश्च । काऽ२ऽ१ । माऽ२इ ॥
आगोऽ२ । मतिव्रजेभजातु । वाऽ२३ । आऽ२ । नाऽ२३४ । औहोवा ॥ ईऽ२३४५ ॥
(दी० [illegible] । प० [illegible] । मा० [illegible])

[illegible]

५९ उप त्वा जामयो गिरः० । (ऋ० ८।१०२।१३; सा. १३,१५७०; प्र. गे. २२-२३)
६० बृहदिन्द्राय गायत० । (ऋ० ८।८९।१; सा.२५८; प्रा. गे. ४४४-४४५)

(५८।८)

उवा । ओवा । (द्वे द्विः) । उवा । ओवाऽ३ । आइन्द्राम् । नरानेमधिताहवाऽ२३न्ताऽ३इ ॥ यात्पा । यायुनजतेधियाऽ२३स्ताऽ३ः ॥ शूरो । नृपाताश्रवसश्चकाऽ२३माऽ३इ ॥ आगो । मतिव्रजेभजातुवाऽ२३न्नाः । उवा । ओवा । (द्वे द्विः) । उवा । ओऽ२ । वाऽ२३४ । औहोवा ॥ ईऽ२३४५ ॥ (दी० ११ । प० २३ । मा० ६)८(गू । ९७)

(५९।१) ॥ बृहस्पतेर्वलभिदी द्वे, इन्द्रस्य वा उद्भिद्वा अनयोः पूर्वम् । बृहस्पतिर्गायत्रीन्द्रः ॥

होवाइ । (द्विः) । होवाऽ३हाइ । उपत्वाजाऽ२माऽ३योगिरः ॥ होवाइ । (द्विः) । होवाऽ३हाइ । देदिशतीऽ३र्हाऽ३विष्कृतः ॥ होवाइ । (द्विः) । होवाऽ३हाइ । वायोरनीऽ३काऽ३अस्थिरन् ॥ होवाइ । (द्विः) । होवाऽ३हाऽ३४ । औहोवा ॥ ईऽ२३४५ ॥ (दी० २७ । प० १७ । मा० १५)९(छु । ९८)

(५९।२) ॥ बृहस्पतेर्वलभित् । बृहस्पतिर्गायत्रीन्द्रः ॥

ओवा । (द्विः) । ओवाऽ३हाइ । उपत्वाजाऽ३माऽ३योगिरः ॥ ओवा । (द्विः) । ओवाऽ३हाइ । देदिशतीऽ३र्हाऽ३विष्कृतः ॥ ओवा । (द्विः) । ओवाऽ३हाइ । वायोरनीऽ३काऽ३अस्थिरन् ॥ ओवा । (द्विः) । ओवाऽ३हाऽ३४ । औहोवा ॥ ईऽ२३४५ ॥ (दी० २७ । प० १७ । मा० ७)१०(छू । ९९)

॥ प्रथमः खण्डः ॥ १ ॥

(६०।१) ॥ भर्गयशसी द्वे; तत्राद्यमिदं भर्गम् भर्गो वा । प्रजापतिर्बृहतीन्द्रः ॥

हाउधामयत् । हाहाउधामधामायत् । हाहाउबृहद्धामधामायत् । बृहदिन्द्रा । यगाऽ२याऽ२३४ता ॥ मरुतोवृ । त्रहाऽ२न्ताऽ२३४माम् ॥ येनज्योतिरजनयन् । ऋताऽ२वाऽ२३४द्धोः ॥ देवन्देवा । यजाऽ२गृऽ२३४वी । हाउधामयत् । हाहाउधामधामयत् । हाहाउबृहद्धामधा । माऽ२ । याऽ२३४ । औहोवा ॥ एऽ३ । भर्गाऽ२३४५ः ॥ (दी० २९ । प० १९ । मा० १५)११(धु । १००)

[साम-तन्त्र-सूत्राणि] [९७]८ वाहि ५.२.३; [९८]९[९९]१०[१००]११(पृथक् सूत्राणि न सन्ति)

तवेदिन्द्रावमं वसु० । (ऋ. ७।३२।१६; सा. २७०; ग्रा. गे. ४६६)

६१ तवेदिन्द्रावमं वसु० । (ऋ० ३।३१।२; सा. ५२; ग्रा. गे. १०-९१)

६२ कायमानो वना त्वं० ।

॥ द्वितीयश्चैतद् यशःसाम । गायत्र्यग्नि(प्रजापति र्बृहतीन्द्रः ॥

(६१।२)
हाउहाउहाउ । यशोहाउ । (त्रिः) । वर्चोहाउ । (त्रिः) । आस्मिनृस्थिहाइ । (द्विः) ।
आस्मिनृस्थिहाऽ३१उ । वाऽ२ । तवेदिन्द्रावमंवसु ॥ त्वंपुष्यासिमध्यमम् ॥
सत्राविश्वस्यपरमस्यराजसि ॥ नकिष्ट्वागोषुवृण्वते । हाउहाउहाउ । यशोहाउ । (त्रिः) ।
वर्चोहाउ । (त्रिः) । आस्मिनृस्थिहाइ । (द्विः) । आस्मिनृस्थिहाऽ३१उ ।
वाऽ२ ॥ आयुर्विश्वायुर्विश्वंविश्वमायुरशीमहिप्रजांत्वष्टराधिनिधत्स्मेऽशतंनोविमशरदोवियन्तेऽ२३४५ ॥ (छ । १०१)
(दे० ४७ । उ० २७ । ना० ३१)

॥ यामे द्वे । यमो बृहत्यग्निः ॥

(६२।१)
कायमानोवनात्वाम् ॥ यन्मातृरजगानाऽ१पाऽ२ः । औऽ२ । हौऽ२ । हुवाइ ।
औऽ३होऽ२३४वा ॥ नतत्तेअग्नेप्रमृषेनिवार्त्तोऽ१नाऽ२म् । औऽ२ । हौऽ२ ।
वाइ । औऽ३होऽ२३४वा ॥ यद्दूरसन्निहाभूऽ१वाऽ२ः । औऽ२ । हौऽ२ ।
हुवाइ । औऽ३होऽ२३४५वाऽ६५६ ॥ ए । राजं३स्वराजाऽ२३४५म् ॥ (दो । १)
(दे० १४ । उ० १८ । ना० १)

(६२।२)
औहावाऽ२ । (द्विः) । औ । होऽ२ । वाऽ२३४ । औहोवा । कायमानोवनात्वम् ॥ (द्विः) ।
औहोवाऽ२ ॥ यन्मातृरजगन्नपः ॥ नतत्तेअग्नेप्रमृषेनिवर्तनम् । यद्दूरसन्निहाभुवः । औहोवाऽ२ ॥
औ । होऽ२ । वाऽ२३४ । औहोवा ॥ ए । विराजं३स्वराजाऽ२३४५म् ॥ (दे । २)
(दे० ११ । उ० १८ । ना० १)

[illegible] १३.३.५; [illegible] १३.३.८; [illegible]

[साम-तन्त्र-सूत्राणि] [१०१] [illegible] [१०२] [illegible]

बौ । १३.८.१०;

छा० गा० ६३

६३ प्र सोम देववीतये० । (ऋ० ९।१०७।१२; सा. ५१४, ७६७; ग्रा. गे. ९७३-९७७)
६४ अयं पूषा रयिर्भगः० । (ऋ० ९।१०१।७; सा. ५४६, ८१८; ग्रा. गे. १०६२-१०६४)

(६३।१) ॥ घर्मतनू द्वे । प्रजापतिर्बृहतीसोमः ॥

हाउहाउहाउ । प्रसोमदेवऽ३वाइताऽ१याऽ२३इ ॥ हाउहाउहाउ ।
सिन्धुर्नपिप्येऽ३आर्णाऽ१साऽ२३ ॥ हाउहाउहाउ । अꣳशोःपयसामदिरोनऽ३जागृऽ१वीऽ२३ ॥
हाउहाउहाउ । अच्छाकोशंमऽ३धूश्चूऽ१ताऽ२३म् । हाउहाउहाउ । वा ।
घर्मःप्रवृक्तस्तन्वासमानृधवृधसुवाऽ२३४५ः ॥ (दी० २४ । प० ११ । मा० २१)१५(त । १०४)

(६३।२)
ओहोऽ३वा । (त्रिः) । ईऽ२या । (त्रिः) । आइहीऽ२ । (त्रिः) । प्रसोमदे ।
ववाऽ२इताऽ२३४याइ ॥ सिन्धुर्नपि । प्येआऽ२र्णाऽ२३४सा ॥ अꣳशोःपयसामदिरः ।
नजाऽ२गृऽ२३४वीः ॥ अच्छाकोशम् । मधूऽ२श्चूऽ२३४ताम् । ओहोऽ२वा । ईऽ२या । (त्रिः)
आइहीऽ२ । आइहीऽ२३ । (त्रिः) । आऽ२इ । हाऽ२३४ । ओहोवा ॥
घर्मःप्रवृक्तस्तन्वासमानसोमहसुवाऽ२३४५ः ॥ (दी० १३ । प० २९ । मा० १४)१६ (ढी । १०५)

(६४।१) ॥ प्रजापतेश्चक्षूꣳषि त्रीणि । प्रजापतिरनुष्टुप्सोमः ॥

अयंपूषाऽ३ओऽ२३४वा ॥ रयिर्भगः । रयिर्भागाऽ३ओऽ२३४वा । पाऽ२३४वः ॥
सोमःपुनाऽ३ओऽ२३४वा । नोअर्षति । नोअर्षाताऽ३ओऽ२३४वा । पूऽ२३४वाः ।
पतिर्विश्वाऽ३ओऽ२३४वा । स्यभूमनः । स्यभूमानाऽ३ओऽ२३४वा । ज्याऽ२३४वीः ॥
विचख्यद्रोऽ३ओऽ२३४वा । दसीऽउभे । दसीउभाऽ३ओऽ२३४वा ॥ चाऽ२३४वः ॥
(दी० ३ । प० १६ । मा० १८)१७(मै । १०६)

[illegible] [१०५]१६ ([illegible]) [१०६]१७ [illegible]
[illegible]

सुकक्ष आङ्गिरसः । इन्द्रः । गायत्री । (ऋ० ८।९३।१३)

त्वमेतदधारयः कृष्णासु रोहिणीषु च । परुष्णीषु रुशत्पयः ॥ ५९५ ॥

६५　त्वमेतदधारयः कृष्णासु रोहिणीषु च । परुष्णीषु रुशत्पयः ॥ ५९६ ॥

(६४।२)

अयम् । पूऽ२षाऽ२३४औहोवा ॥ रयिर्भगः । रयिः । भाऽ२गाऽ२३४औहोवा ।
सोमःपुनानोअर्षति । नोअ । पाऽ२ताऽ२३४औहोवा । पतिर्विश्वस्यभूमनः ॥
स्यभू । माऽ२नाऽ२३४औहोवा ॥ व्यख्यद्रोदसीउभे । दसी ।
रूऽ२भाऽ२३४औहोवा । चाऽ२३४स्रूः । औहोऽ३१इ । औऽ२होऽ२३४वा ।
घूऽ२३४वाः । औहोऽ३१इ । औऽ२होऽ२३४वा । ज्योऽ२३४तीः ।
औहोऽ३१इ । औऽ२होऽ२३४वा ॥ चाऽ२३४स्रूः ॥ (दी० २३ । प० २४ । मा० १९)१८(डो । १०७)

(६४।३)

एअयम्पूषारयिर्भगाः ॥ सोमःपुना । इहा । नोऽ२अर्षा । इडा ।
ताइपतिर्विश्वस्यभूऽ१माऽ३नाः ॥ वियख्यद्रोदसाऽ२३होइ ॥ उभआऽ३१उवाऽ२३ ॥
इद्सियइडाऽ२३४५ ॥　　　　(दी० ५ । प० ९ । मा० ९)१९(भो । १०८)

॥ वार्षाहराणि त्रीणि । वृषाहरिर्गायत्री सोमः ॥

(६५।१)

हाउत्वमेताद् ॥ एतदताद् । आधाराऽ२३४याः । कृष्णासुरोहिणाऽ१इपूऽ३चा ॥
परुष्णाऽ२३इपू ॥ रुशद् । पाऽ२याऽ२३४औहोवा ॥　(दी० ८ । प० ७ । मा० ८)२०(टे । १०९)

(६५।२)

त्वमेतद्धोहाइ ॥ होइ । आधाऽ१रायाऽ२ः । होइ । कृष्णोऽ१सुरोऽ२ । होइ ।
हाइणीऽ१षुचाऽ२ ॥ होइ । पारुष्णाऽ१इषूऽ२ ॥ होइ । रुशद् । पाऽ२याऽ२३४औहोवा ॥
(दी० ३ । प० ११ । मा० ११)२१(ट । ११०)

[साम-तन्त्र-सूचादि [१०७]१८ [१०८]१९ [१०९]२० [११०]२१ ([illegible])

६६ यच्छक्रासि परावति० । (ऋ० ८।९७।४; सा. २६४; ग्रा. गे. ४५७-४५८)

६७ अभी नवन्ते अद्रुहः०। (ऋ० ९।१००।१; सा. ५५०; ग्रा. गे. १०८०-१०८२)

(६५।३)
आइत्वमेतात् ॥ आआधाऽ१रायाऽ२ः । आइकार्ष्णाऽ१सुरोऽ२ । आइहाइणीऽ१पुचाऽ२ ॥ आइपारुष्णाइपूऽ२ ॥ आइ । रुशत् । पाऽ२याऽ२३४औहोवा ॥ अभिस्फूर्जयंद्विष्मः । समोपाभिस्फूर्जयंद्विष्मः । अस्मभ्यंगातुवित्तमाऽ२३४५म् ॥

(दी० ९ । प० ११ । मा० १५)११(तु।१११)

॥ द्वादश द्वितीयः खण्डः ॥ २ ॥

इति ग्रामेगेय आरण्यकगाने द्वितीयः प्रपाठकः ॥ २ ॥

(६६।१) ॥ धैते द्वे, धौगते वा । द्युतो बृहतीन्द्रः ॥

हाउयच्छक्रासी ॥ पाराबाऽ२३४ती । ईऽ४य । इयाऽ२३४ । इयाहाउ ॥ याद्वाऽ२३४र्वा । ताइवृत्राऽ२३४हान् । ईऽ४य । इयाऽ२३४ । इयाहाउ ॥ आतस्त्वाऽ२३४र्गी । भाइर्द्युगाऽ२३४दी । द्राकेशाऽ२३४इभीः । ईऽ४य । इयाऽ२३४ । इयाहाउ ॥ सुतावाऽ२३४आ । वाइवासाऽ२३४ती । ईऽ४य । इयाऽ२३४ । इयाऽ५हाउ ॥ वा ॥ अश्वमिष्टयेऽ२हस ॥ (दी० २ । प० २३ । मा० १६)१(जि।११२)

(६६।२)
इयाहि । इयाऽ२३४५ । (त्रे त्रिः) । इयाहाउ । यच्छ्रा । क्राऽऽ । सीऽ३पाऽ२रावति ॥ याद्वा । र्वाऽऽ । वाऽ३त्राऽ३हृत्रहन ॥ आतः । त्वाऽऽ । गीर्भिर्द्युगदीऽ२न्द्राऽ३केशिभिः ॥ सुता । वाऽऽ । आऽ३वीऽ३वासति । ईऽ४य । इयाऽ२३४५ ॥(त्रे त्रिः) । इयाऽ५हाउ । वा ॥ अश्वदिष्टयेऽ२हस ॥ (दी० ४ । प० २८ । मा० ७)१(दे । ११३)

(६६।३) [illegible] ॥

[illegible] । [illegible] । [illegible] । [illegible] । ईऽ२३४डा ॥ मा ।
[illegible] । [illegible] । [illegible] । ईऽ२३४डा ॥ वो । [illegible] ।
[illegible] । [illegible] । ईऽ२३४डा ॥ वा । [illegible] । निपाऽ२१२ ।
[illegible] ॥ ([illegible])३(मां । ११४)

[illegible]
[illegible]

६८ यदिन्द्र शासो अव्रतं०। (न ऋग्वेदे यः; सा० २६८; अ. वे. ५११)

(३।१२)
अमीनव तंआऽ३१उवाऽ२३। हूऽ२३४हाः। होइ। हो। वाहाऽ३१उवाऽ२३।
इऽ२३४डा॥ प्रियमिन्द्र। स्यकाऽ३१उवाऽ२३। मीऽ२३४याम्। होइ। हो।
वाहाऽ३१उवाऽ२३। इऽ२३४डा॥ वत्संनपू। वंआऽ३१उवाऽ२३। यूऽ२३४नी।
होइ। हो। वाहाऽ३१उवाऽ२३। इऽ२३४डा॥ जातश्चरिह। विमाऽ३१उवाऽ२३।
वाऽ२३४राः। होइ। हो। वाहाऽ३१उवाऽ२३॥ इड्स्थिइडाऽ२३४५॥

(दी० ७। प० २८। मा० १८)३(जै। ११५)

(३।८३) ८ वौरश्रवसे द्वे। तुरश्रवाः बृहतीन्द्रः॥

यदिन्द्रशासोअव्रताम्॥ च्यावयासदाऽ३साऽ२३स्पराइ। आऽ२३स्मा। कम।
इंनाषाऽ१वाऽ२३न्। पूरूऽ२स्पृऽ२३४हाम्॥ वसान्याआऽ३४। औहोवा॥
षाऽ२३इवाऽ३। हाऽ२वाऽ२३४औहोवा॥ याऽ२३४५॥

(दी० ८। प० ११ मा० ८)५(टै। ११६)

(३।८३)
याऽ५दिन्द्र। शाऽ३सोऽ३अव्रतान्॥ च्यावयासाऽ२। दसास्पाऽ१राऽ२इ।
उवाऽ३। औऽ३वा। अस्माकाऽ१नाऽ२। शुंनाषाऽ१वाऽ२न्। उवाऽ३। औऽ३वा।
पुरूस्पृऽ१हाऽ२म्॥ वसान्याऽ१याऽ२। उवाऽ३। औऽ३वाऽ३॥ षिवोवा।
हाऽ५योऽ६हाइ॥ (दी० २। प० १३। मा० ६)३(चू। ११७)

---

६६ यच्छक्रासि परावति० । (ऋ० ८।९७।४; सा. २६४; ग्रा. गे. ४५७-४५८)

६७ अभी नवन्ते अद्रुहः०। (ऋ० ९।१००।१; सा. ५५०; ग्रा. गे. १०८०-१०८२)

(६५।३)

आइत्वमेतात् ॥ आआधाऽ१रायाऽ२ः । आइकार्ष्णाऽ१सुरोऽ२ । आइहाइणीऽ१पुचाऽ२ ॥ आइपारुष्णाइपूऽ२ ॥ आइ । रुशत् । पाऽ२याऽ२३४औहोवा ॥ अभिस्फूर्जयद्विष्मः । समोपाभिस्फूर्जयंद्विष्मः । अस्मभ्यंगातुवित्तमाऽ२३४५म् ॥

(दी० ९ । प० ११ । मा० १५)२२(तु।१११)

॥ द्वादश द्वितीयः खण्डः ॥ २ ॥

इति (ग्रामे) आरण्यकगाने द्वितीयः प्रपाठकः ॥ २ ॥

(६६।१) ॥ यौते द्वे, यौगते वा । द्युतो बृहतीन्द्रः ॥

हाउयच्छाक्रासी ॥ पारावाऽ२३४ती । ईऽ४य । इयाऽ२३४ । इयाहाउ ॥ यादवोऽ२३४वा । ताइवृत्राऽ२३४हान् । ईऽ४य । इयाऽ२३४ । इयाहाउ ॥ आतस्त्वाऽ२३४गी । भाइर्द्युगाऽ२३४दी । द्राकेशाऽ२३४इभीः । ईऽ४य । इयाऽ२३४ । इयाहाउ ॥ सुतावाऽ२३४आ । वाइवासाऽ२३४ती । ईऽ४य । इयाऽ२३४ । इयाऽ५हाउ ॥ वा ॥ अश्वमिष्टयेऽ२हस् ॥ (दी० २ । प० २३ । मा० १३)१(जि।११२)

(६६।२)

ईऽ४य । इयाऽ२३४५ । (द्वे त्रिः) । इयाहाउ । याच्छा । क्राऽऽ । सीऽ२पाऽ२रावति ॥ यादा । वोऽऽ । वाऽ३ताऽ३इवृत्रहन् ॥ आताः । त्वाऽऽ । गीर्भिर्द्युगदीऽ२न्द्राऽ३केशिभिः ॥ सुता । वाऽऽऽ । आऽ२वीऽ३वासति । ईऽ४य । इयाऽ२३४५ ॥ (द्वे त्रिः) । इयाऽ५हाउ । वा ॥ अश्वदिष्टयेऽ२हस् ॥ (दी० ४ । प० २८ । मा० ७)२(दे । ११३)

(६७।१) ॥ तास्येन्द्रे द्वे, तास्विन्द्रे तास्पन्द्रे वा । तस्येन्द्र तस्पन्द्रो वा अनुष्टुप्सोमः सोमेन्द्रो वा ॥

आऽ । भीनव । तआऽ२१२ । द्रुहआऽ३१उवाऽ२३ । ईऽ२३४डा ॥ प्रा । यमिन्द्र । स्यकाऽ२१२ । मियमाऽ३१उवाऽ२३ । ईऽ२३४डा ॥ वा । त्संनपू । वेआऽ२१२ । युनियाऽ३१उवाऽ२३ । ईऽ२३४डा ॥ जा । तश्रिह । तिमाऽ२१२ । नरआऽ३१उवाऽ२३ ॥ इडम्यिडडाऽ२३४५ ॥ (दी० ३ । प० २० । मा० ९)३(जो । ११४)

[साम-तन्त्र-सूत्राणि][१११]२२ त्वं नटः १३.१.४; हरे च १३.१.९; वार्णोदरतृतीये १३.११.९; [११२]१ द उन्न ५.४.७; नद्. ११.१०.१; [११३]२ महस्तास्पन्द्रे १३.८.३; [११४]१ (पृथक् सूत्राणि न सन्ति)

६८ यदिन्द्र शासो अव्रतं० । (न ऋग्वेदीयः; सा० २९८; ग्रा. गे. ५११)

(६७।१)

अभीनव तआऽ३१उवाऽ२३ । ङ्रूऽ२३४हाः । होइ । हो । वाहाऽ३१उवाऽ२३ ।
ईऽ२३४डा ॥ प्रियमिन्द्र । स्यकाऽ३१उवाऽ२३ । मीऽ२३४याम् । होइ । हो ।
वाहाऽ३१उवाऽ२३ । ईऽ२३४डा ॥ वर्त्सनपू । वेंआऽ३१उवाऽ२३ । यूऽ२३४नी ।
होइ । हो । वाहाऽ३१उवाऽ२३ । ईऽ२३४डा ॥ जातथरिह । तिमाऽ३१उवाऽ२३ ।
ताऽ२३४राः । होइ । हो । वाहाऽ३१उवाऽ२३ ॥ इद्स्थिइडाऽ२३४५ ॥

(दी० ७ । प० २८ । मा० १८)४(जै । ११५)

(६८।१) ॥ तौरश्रवसे द्वे । तुरश्रवाः बृहतीन्द्रः ॥

यदिन्द्रशासोअव्रातम् ॥ च्यावयासदाऽ३साऽ२३स्पराइ । आऽ२३स्मा । कम ।
शुंमाघाऽ१वाऽ२३नू । पूरूऽ२स्पृऽ२३४हाम् ॥ वसान्याआऽ३४ । औहोवा ॥
घाऽ२३इवाऽ३ । हाऽ२वाऽ२३४औहोवा ॥ याऽ२३४५ ॥

(दी० ८ । प० ११ मा० ८)५(टै । ११६)

(६८।२)

याऽ५दिन्द्र । शाऽ३सोऽ३अव्रातम् ॥ च्यावयासाऽ२ । दसास्पाऽ१राऽ२इ ।
उवाऽ३ । औऽ३वा । अस्माकाऽ१माऽ२ । शुंमाघाऽ१वाऽ२नू । उवाऽ३ । औऽ३वा ।
पुरूस्पृऽ१हाऽ२म् ॥ वसान्याऽ१याऽ२ । उवाऽ३ । औऽ३वाऽ३ ॥ धिवोवा ।
हाऽ५योऽ६हाइ ॥ (दी० २ । प० १६ । मा० ६)६(चू । ११७)

[साम-तन्त्र-सूत्राणि][११५]४ [११६]५ (पृथक् सूत्राणि न सन्ति) [११७]६ अग्र. १०.७.५;

६६ यच्छक्रासि परावति० । (ऋ० ८।९७।४; सा. २६४; ग्रा. गे. ४५७-४५८)

६७ अभी नवन्ते अद्रुहः०। (ऋ० ९।१००।१; सा. ५५०। ग्रा. गे. १०८०-१०८२)

(६।१।३)

आइत्वमेतात् ॥ आआधाऽ१रायाऽ२ः । आइकार्ष्णाऽ१सुरोऽ२ । आइहाइणीऽ१षुचाऽ२ ॥ आइपारुष्णाइपूऽ२ ॥ आइ । रुशत् । पाऽ२याऽ२३४औहोवा ॥ अभिस्फूर्जयद्विष्मः । रामापाभिस्फूर्जयद्विष्मः । अस्मभ्यंगातुवित्तमाऽ२३४५म् ॥

(दी० ९ । प० ११ । मा० १५)११(तु।१११)

॥ द्वादश द्वितीयः खण्डः ॥ २ ॥

इति ग्रामे॰ आरण्यकगाने द्वितीयः प्रपाठकः ॥ २ ॥

(३।१।१) ॥ द्यौते द्वे, द्यौगते वा । द्युतो बृहतीन्द्रः ॥

...आकासी ॥ पाराघाऽ२३४ती । ईऽ४य । इयाऽ२३४ । इयाहाउ ॥ ...वाऽ२३४रा । ताइवृत्राऽ२३४हान् । ईऽ४य । इयाऽ२३४ । इयाहाउ ॥ ...ताऽ२३४र्गा । माइर्तृगाऽ२३४दी । द्राकेशाऽ२३४इभीः । ईऽ४य । इयाऽ२३४ । इयाहाउ ॥ धृताचाऽ२३४आ । वाइवासाऽ२३४ती । ईऽ४य । इयाऽ२३४ । इयाऽ५हाउ ॥ वा ॥ अश्वमिष्टयेऽ३हस् ॥ (दी० २ । प० २३ । मा० १२)१(जि।११२)

(...)

...। इयाऽ२३४५ । (द्वे त्रिः) । इयाहाउ । याच्छा । क्राऽऽ । सीऽ२पाऽ२रावति ॥ ... । ... । ...ताऽ३वृत्रहन् ॥ आताः । त्वाऽऽ । गीर्भिर्द्युगदीऽ२न्द्राऽ३केशिभिः ॥ ... । ... । आऽ३र्वाऽ३वामनि । ईऽ४य । इयाऽ२३४५ ॥ (द्वे त्रिः) । इयाऽ५हाउ । वा ॥ अश्वदिष्टयेऽ३हस् ॥

(दी० ४ । प० २८ । मा० ७)७(दे । ११३)

(...) ... वात्सन्द्रे, ... वा । ... अनुष्टप्सामः सोमेन्द्रो वा ॥

... । ... । ...ऽ२३ । ...ऽ३१उवाऽ२३ । ईऽ२३४डा ॥ ग्रा । ... । ...ऽ२३ । ...ऽ३१उवाऽ२३ । ईऽ२३४डा ॥ वा । त्संनप् । ... । ...ऽ३१उवाऽ२३ । ईऽ२३४डा ॥ जा । नश्शिद । निपाऽ२१२ । ...ऽ३१उवाऽ२३ ॥ ...ऽ२३४५ ॥

(दी० ३ । प० २० । मा० ७)३(गो । ११४)

[illegible]

६८ यदिन्द्र शासो अव्रतं० । (न ऋग्वेदीयः; सा० २९८; ग्रा. गे. ५११)

(६७।१)
अभीनव तआऽ३१उवाऽ२३ । हूऽ२३४हाः । होइ । हो । वाहाऽ३१उवाऽ२३ ।
ईऽ२३४डा ॥ प्रियमिन्द्र । स्यकाऽ३१उवाऽ२३ । मीऽ२३४याम् । होइ । हो ।
वाहाऽ३१उवाऽ२३ । ईऽ२३४डा ॥ वत्संनपू । वेआऽ३१उवाऽ२३ । यूऽ२३४नी ।
होइ । हो । वाहाऽ३१उवाऽ२३ । ईऽ२३४डा ॥ जातश्‍रिह । तिमाऽ३१उवाऽ२३ ।
ताऽ२३४राः । होइ । हो । वाहाऽ३१उवाऽ२३ ॥ इड्स्थिइडाऽ२३४५ ॥

(दी० ७ । प० २८ । मा० १८)४(जै । ११५)

(६८।१) ॥ तौरश्रवसे द्वे । तुरश्रवाः बृहतीन्द्रः ॥

यदिन्द्रशासोअव्रताम् ॥ च्यावयासदाऽ३साऽ२३स्पराइ । आऽ२३स्मा । कम ।
शुंमाघाऽ१वाऽ२३न् । पूरूऽ२स्पृऽ२३४हाम् ॥ वसाव्याआऽ३४ । औहोवा ॥
घाऽ२३इवाऽ३ । हाऽ२वाऽ२३४औहोवा ॥ याऽ२३४५ ॥

(दी० ८ । प० ११ मा० ८)५(टै । ११६)

(६८।२)
याऽ५दिन्द्र । शाऽ३सोऽ३अव्राताम् ॥ च्यावयासाऽ२ । दसास्पाऽ१राऽ२इ ।
उवाऽ३ । औऽ३वा । अस्माकाऽ१माऽ२ । शुंमाघाऽ१वाऽ२न् । उवाऽ३ । औऽ३वा ।
पुरुस्पृऽ१हाऽ२म् ॥ वसाव्याऽ१याऽ२ । उवाऽ३ । औऽ३वाऽ३ ॥ धियोवा ।
हाऽ५योऽ६हाइ ॥ (दी० २ । प० १३ । मा० ६)३(चू । ११७)

[साम-तन्त्र-सूत्राणि] ११५।४ [११६]।५ (पृथक् सूत्राणि न सन्ति) [११७]।३ अनु० १०.७.५;

६९ स्वादिष्ठया मदिष्ठया० । (ऋ० ९।१।१; सा. ४६८,६८९; प्रा. गे. ८२७-८३५)
७० अग्न युङ्क्ष्वा हि ये तव० । (ऋ० ६।१६।४३; सा. २५, १३८३; प्रा० गे. ४४)

(६९।१) ॥ (धेनुपयसी द्वे,) धेनुसाम । प्रजापतिर्गायत्री सोमः सोमेन्द्रौ वा ॥

हाउहाउहाउ । ओहा । (द्विः) । ओहाइ । इयाहाउ । (त्रिः) । ओहोऽ१इ ।(त्रिः) ।
भुवत् । इडा । स्वादिष्ठया । मादिष्ठया ॥ जनत् । इडा । पवस्वसो ।
माधारया ॥ बुधत् । इडा । इन्द्रायपा । तावाइसुताः ॥ करत् । इडाऽ२३ ।
हाउहाउहाउ । ओहा । (द्विः) । ओहाइ । इयाहाउ । (त्रिः) । ओहोऽ१इ । (द्विः) ।
ओहोऽ१२ । याऽ२३४ओहोवा ॥ एऽ३ । धेनु ॥

(दी० ३३ । प० ३७ । मा० २६)७(ट्ट । ११८

(७०।१) ॥ पयस्साम । प्रजापतिर्गायत्र्यग्निः(प्रजापतिः) ॥

इयोऽ३ । इया । इयोऽ२इया । इयोऽ३ । इया । अग्नेयुङ्क्ष्वाहीऽ३येतवा ।
अग्नेयुङ्क्ष्वा । हीयेतवा । अग्नेयुङ्क्ष्वाहीऽ३येतवा ॥ इयोऽ३ । इया । इयोऽ२इया । इयोऽ३ ।
इया । अश्वासोदाइवाऽ३साधवाः । अश्वासोदाइ । वासाधवाः । अश्वासोदाइवाऽ३साधवाः ॥
इयोऽ३। इया । इयोऽ२इया । इयोऽ३ । इया । अरंवहान्तीऽ३आशवाः। अरंवहा। न्तीयाशवाः।
अरंवहान्तीऽ३आशवाः॥ इयोऽ३ । इया । इयोऽ२इया । इयोइयाऽ३उवाऽ३ ॥
आऽ२ । (त्रिः) । हस्स्थिएऽ३पयाऽ२३४५ः ॥ (दी० २८ । प० ३५ । मा० १९)८(णो । ११९)

[साम-तन्त्र-सूत्राणि][११८]७ निरुक्तायाः ७.११.१; [११९]८ (पृथक् सूत्राणि न सन्ति)

पवित्र आङ्गिरसः । पवमानः सोमः । जगती । (ऋ० ९।८३।३)

अरूरुचदुषसः पृश्निरग्रिय उक्षा बिभर्ति भुवनानि वाजयुः ।
मायाविनो ममिरे अस्य मायया नृचक्षसः पितरो गर्भमा दधुः ॥ ५९६ ॥

७१ अरूरुचदुषसः पृश्निरग्रिय उक्षा मिमेति भुवनेषु वाजयुः ।
मायाविनो ममिरे अस्य मायया नृचक्षसः पितरो गर्भमादधुः ॥५९६॥

(७१।१) ॥ स्वर्ज्योतिषी द्वे । प्रजापतिर्जगती आदित्यः सोमो वा ॥

हाउहाउहाउ । स्वर्विश्वम् । (त्रिः) । अरूरुचत् । (त्रिः) । उषसःपृश्निराऽ२ग्रायाः ॥
हाउहाउहाउ । स्वर्विश्वम् । (त्रिः) । उक्षामिमे । (त्रिः) । तिभुवनेषुवाऽ२जायूः ॥
हाउहाउहाउ । स्वर्विश्वम् । (त्रिः) । मायाविनः । (त्रिः) । ममिरअस्यमाऽ२याया ॥
हाउहाउहाउ । स्वर्विश्वम् । (त्रिः) । नृचक्षसः । (त्रिः) । पितरोगर्भमाऽ२दाधूः ।
हाउहाउहाउ । स्वर्विश्वम् । (द्विः) । सुवाऽ२३र्विश्वाउ । वाऽ३ ॥ एऽ३ । सुवाऽ२३४५ः ॥
([illegible]) (टी । १२०)

(७१।२)
हाउहाउहाउ । ज्योतिर्विश्वम् । (त्रिः) । अरूरुचत् । (त्रिः) । उषसःपृश्निराऽ३ ।
ग्रायाः ॥ हाउहाउहाउ । ज्योतिर्विश्वम् । (त्रिः) । उक्षामिमे । (त्रिः) ।
तिभुवनेषुवाऽ३ । जायूः ॥ हाउहाउहाउ । ज्योतिर्विश्वम् । (त्रिः) । मायाविनः । (त्रि ।
ममिरअस्यमाऽ३ । याया ॥ हाउहाउहाउ । ज्योतिर्विश्वम् । (त्रिः) । नृचक्षसः । (त्रिः) ।
पितरोगर्भमाऽ३ । दाधूः । हाउहाउहाउ । ज्योतिर्विश्वम् । (द्विः) । ज्योताऽ२३र्विश्वाउ ।
वाऽ३ ॥ एऽ३ । ज्योतीऽ२३४५ः ॥ ([illegible]) (टु । १२१)

[illegible]

[illegible]

७२　इन्द्रमिद्गाथिनो बृहत्० । (ऋ० १।७।१; सा. १९८, ७९६; प्रा. गे. ३४०)

७३　उच्चा ते जातमन्धसः० । (ऋ० ९।६१।१०; सा.४६७,५९२-९३,६७२-७४;प्रा. गे.८१४-२१)

७४　विश्वतोदावन्विश्वतः० । (न ऋग्वेदीयः; सा. ४३७, प्रा. गे. ७६५-७६६)

(७२।१)　　॥ यण्वम् । प्रजापतिर्गायत्रीन्द्रः ॥

इन्द्रमिद्गाथिनोबृहत् । एऽ२ । इन्द्रमर्केभिः । अर्किणोवा ॥ औहोवाऔहोवाऔहोवा । औहोहाइ । (त्रिः) । इन्द्रंवाणीरनूऽ२३पताउ । वाऽ३ । ईऽ२३४डा ॥श्री॥ औहोवा (३)। औहोहाइ । (त्रिः) । इन्द्रइद्धर्योऽ२३ःसचाऽ३ । संमिश्लआवचोऽ२३युजाऽ३ ॥ औहोवा (३)। औहोहाइ । (त्रिः) । इन्द्रोवज्रीहिराऽ२३ण्ययाउ । वाऽ३ ॥ ईऽ२३४डा ॥श्री॥ औहोवा (३) । औहोहाइ । (त्रिः) । इन्द्रवाजेषुनोऽ२३अवाऽ३ । सहस्रप्रधनाऽ२३इषुचाऽ३ ॥ औहोवा (३) । औहोहाइ । (त्रिः । उग्रउग्राभिरूऽ२३तिभाउ । वाऽ३ ॥ इट्स्थिइडाऽ२३४५ ॥

(दी० ७१ । प० ३७ । मा० ३६)११(खू । १२२)

(७३।१)　　॥ अपत्यम् । प्रजापतिर्गायत्री सोमः ॥

हाउहाउहाउ । उच्चातेजातमाऽ२३०धसाऽ३ः ॥ हाउहाउहाउ । दिविसद्भूमियाऽ२३ददाऽ३इ । हाउहाउहाउ । उग्र१शर्ममहाऽ२३इश्रवाउ । वाऽ३ ॥ ईऽ२३४डा ॥श्री॥ हाउहाउहाउ । सनइन्द्रायययाऽ२३ज्यवाऽ३इ ॥ हाउहाउहाउ । वरुणायमरूऽ२३द्भियाऽ३ः ॥ हाउहाउहाउ । वरिवोवित्पराऽ२३इस्रवाउ । वाऽ३॥ ईऽ२३४डा ॥श्री॥ हाउहाउहाउ । एनाविश्वानिआऽ२३र्यआऽ३ ॥ हाउहाउहाउ । द्युम्नानिमानुषाऽ२३णाऽ३म् ॥ हाउहाउहाउ । सिषासन्तोवनाऽ२३महाउ । वा ॥ इट्स्थिइडाऽ२३४५ ॥　(दी० ४१ । प० २४ । मा० ४१)१२(घ । १२३)

॥ आयुर्नवस्तोभे द्वे, आयुस्साम । प्रजापतिर्विष्टारपंक्तिरिन्द्रः ॥

उवा । विश्वतोदावन्विश्वतोनआभर ॥ हाउ(३)वा । यन्वाशविष्ठमीमहे ।
आयुः । हाउ(३)वा ॥ स्वः । हाउ(३)वा ॥ ज्योतिः ।
॥ ईऽ२३४५ ॥　(दी० १० । प० १२ । मा० २२)१३(फ्रा । १२४)

